N. A.

Shivarahasya: Ishanakhye-Pt. 10 (Uttarardhya)

शिवरहस्ये: ईशानाख्ये - दशमांश उत्तरार्ध

Sanskrit

Paper - Handwritten

1920 San (98 years old)

50 Folio

14.8" x 9"

Complete

श्रीगणेशायनमः॥श्रीकाशीविश्वेश्वरायनमः॥ ॥इंदुखंडशिरसोवरात्मजंवक्रतुंडमगजाननूभवं॥
नौमुमःप्रणतदुःखखंडनंविघ्नपंक्सरदखंडसत्करं॥१॥ ॥मुनिरुवाच॥ ॥नमस्तेतारकारातेपुराराति
कृपाकरे॥हरतेवृजिनौघानांस्मरतेशिवपादयोः॥२॥शिवधर्मोमहासारःसर्वधर्मोत्तमोत्तमः॥शिवप्रसा
दजनकःसर्वेषामेवदेहिनां॥३॥वर्णाश्रमाणांसधर्मःसुकरःसर्वदाकथं॥किंतेनाचरितेनेशःप्रसीदति
महेश्वरः॥४॥क्षिप्रंप्रसादजनकोदेवदेवस्यशूलिनः॥तस्यस्वरूपमधुनावदसेनापतेधुना॥५॥शिवद्रो
हःकथंप्रोक्तःयःप्रायश्चित्तवर्जितः॥तस्यस्वरूपंवदमेश्रोतुमुत्कंठतेमनः॥६॥कोवास्यप्रश्नभारस्यवक्ता
त्वादृग्तेनघ॥पावयास्मान्कथासारैर्गणान्देवान्मुनीनपि॥७॥ सूतउवाच॥इत्थंस्कंदस्तदापृष्टोजैगी
षव्येनसत्तमाः॥उवाचनत्वादेवेशंवीक्ष्यदेवान्मुनीन्गणान्॥८॥श्रीस्कंदउवाच॥स्मरारातिप्रसादाय
क्षिप्रंधर्मोयमुत्तमः॥शिवधर्मोडुपःश्रीमान्उत्तारकउदाहृतः॥संसारार्णवमग्नानांपापिनांसुकृता
मपि॥कैलासशिखरेगौर्यैपुरापृष्टोमहेश्वरः॥१०॥शिवधर्मंमहासारंअल्पायासंमहत्फलं॥अनिष्कृ
तिमहत्पापंशिवद्रोहंतथामुने॥११॥सेतिहासंवदद्गौर्यैमयातच्छ्रुतमोजसा॥तच्छृणुष्वविशेषेणसहैभिः
सावधानतः॥१२॥रत्नप्रासादमध्यस्थंकैलासेवामनोहरं॥प्रांजलिर्विनयोपेताउवाचपरमेश्वरं॥१३॥सु
प्रसन्नंमुखांभोजंरत्नाभरणभूषितं॥अनेकचंद्रसूर्याग्निभासाभासितविग्रहं॥१४॥त्रिपुंड्रविलसत्फालंभ
स्मपांडरशोभितं॥सुधाकरधरंशंभुंगंगाधरमुमासखं॥१५॥नंदिभृंगिमहाकालचंडमुंडनिषेवितं॥षड्
क्रेणभवक्रेणपार्श्वतःपरिसेवितं॥१६॥उवाचदेवीशानंदंविनयोदारसद्वचः॥ ॥श्रीदेव्युवाच॥भगवन्भ
वभूतेशव्योमकेशसदाशिव॥वृषध्वजविरूपाक्षकलधौतगिरिप्रिय॥१७॥त्रियंबकजगन्मूर्तेसच्चिदा
नंदविग्रह॥कालकालपुरारातेमन्मथांधसूदन॥१८॥नीलकंठमहादेवसांबसर्वजगत्पते॥विश्वसर्गस्थि

त्रिलयप्रकाशकरलोचन॥१९॥ गंगाधरशिवरूपास्मदस्मदीक्षापहारक॥ प्रसीद देव सर्वज्ञ विज्ञप्तिः काचिदस्ति
मे॥२०॥ तां त्वं शृणु करुणेश शीघ्रं कर्णरसायनं॥ भवार्णवनिमग्नानां प्रजानामविवेकिनां॥२१॥ क्षिप्रप्रसादज्ञ
ननमल्पायासं महत्फलं॥ शिवधर्मं महापुण्यं सर्वधर्मोत्तमोत्तमं॥२२॥ शिवद्रुहां पापभोगं कथयस्वामरेश्व
रः॥ शिवधर्मप्रकारः कः शिवद्रोहश्च को भवेत्॥२३॥ कृत्वा ते भक्तिमंतस्ते शिवधर्मं महाफलं॥ संप्राप्नुवन्ति
वमानित्यं विष्णुब्रह्मादिदुर्लभं॥२४॥ दक्षिणोत्तरकैलासवासदं परमेश्वर॥ भक्तानां तारतम्येन ब्रह्मक्षत्रवि
शांप्रभो॥२५॥ संकराणां च शूद्राणां तिरश्चामपि भोगदं॥ देवगंधर्वयक्षाणां मुनीनां च गणत्वदं॥२६॥ सारू
प्यं चैव सामीप्यं सायुज्यं च सलोकतां॥ स्वभक्तितारतम्येन भक्तानां तव सिद्धिदं॥२७॥ शिवधर्मं महापुण्यं
सेतिहासं वद प्रभो॥ यच्छ्रुत्वा निगमैर्गोप्यं स्मृतिभिर्नोदितं क्वचित्॥२८॥ स्मर्तारः स्वाधिकारेण प्रवदंत्य
ल्पसिद्धिदं॥ वर्णाश्रमायासधर्मैर्द्वैधं गुण्यपापदं॥२९॥ कृतेऽप्यल्पजपुण्यं च मुनयोऽन्ये वदंत्यपि॥ न
दुर्मोचरणे नैव विश्रांता जननाभुवि॥३०॥ कथं त्वत्प्रवृद्धं नेशं भो धर्मं जानंति पामराः॥ येन चीर्णेन मुक्ताः स्युः
देवतिर्यङ्नरागणाः॥३१॥ शिवद्रुहां पापभोगो निरूपितो मुनीश्वरैः॥ शिवधर्मः शिवद्रोहस्वरूपं
नैर्न चैव श्रुतं॥३२॥ श्रुतिस्मृतिपुराणेषु न वेदव्यानचश्रुतः॥ नेश्वषोडशदानानां गोभूम्यन्नप्रदायिनां॥३३॥
मखादिकर्मकर्तॄणां स्वर्गभोगं वदंति ते॥ महापापादिमुख्यानां क्षुद्राणां महतामपि॥३४॥ प्रोचुस्ते निष्कृ
तिं शास्त्रे मुनयः स्मृतिपारगाः॥ शिवधर्मं शिवद्रोहस्वरूपं नैव हि श्रुतं॥३५॥ तस्मादेतत्फलं शंभो शिव
द्रोहस्य निष्कृतिः॥ नैनं क्वादेवदेवेश त्वमेव वद मेऽधुना॥३६॥ देव्युवाच॥ ॥हे कृत्तिवास कलधौत नगाग्र
वास चंद्रावतंस मुनिमानसराजहंस॥ मद्भक्तपक्षसुविकासनमुख्यहंस स्कंदेभवक्त्रपरिलोकनमंदहास॥
॥३७॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरार्धे प्रथमोऽध्यायः॥१॥ ॥श्रीईशानाय नमः॥ श्रीईश्वर

उवाच॥ ॥शृणुशैलसुतेबालेविशालेविमलोज्वले॥तिलकांकितमस्तकेकर्णोल्लंबिमहोत्पले॥१॥
नवोदारवचोमाध्वीसा[illegible]ध्वीसर्वानुकंपिनी॥संसाराब्धिनरैःपुण्यआतरस्तारकोत्तणं॥२॥सर्वेधर्माः
श्रुतिप्रोक्तायाजनाध्यायनेफलाः॥स्मृत्युक्तावर्णधर्मास्तेपौराणव्रतकीर्तिनाः॥३॥सर्वभोगप्रदाःसर्वेभुविदुर्वै
कसाधनाः॥फलंनपानदाधर्माइष्टापूर्तादयोविके॥४॥इष्टनुष्टाश्रमुनयोपूर्त्तोगनेगतिप्रदाः॥देवभोग
प्रदाएतेनपशुधर्मास्मृताःशिवे॥५॥पशवोदेवताःसर्वातेषांपतिरहंशिवः॥ससर्वधर्मरात्देविअस्यायासो
महत्फलं॥६॥पतिधर्मोममप्रोक्तोशिवधर्मोयमेवहि॥भक्तानांअधिकारोत्रशिवधर्मेसनातने॥७॥पुरुषा
र्थप्रदोप्यत्रास्मिप्रेमप्रीतिदायकः॥इष्टपूर्तात्मकाःकेचिज्जपाःप्रोक्तास्तथा॥८॥अतिरुद्रमहारुद्रेपि
वहोमाग्निकार्यतः॥हावनाःशिवधर्मेत्रकीर्तितापरमेश्वरि॥९॥मन्मूर्तिध्यानतोदेविशिवधर्माहिमानसाः॥
कायिकाःशिवधर्माहिशिवलिंगेशिवार्चनं॥१०॥बिल्वपत्रार्जनंहस्तैःपादाभ्यांचप्रदक्षिणाः॥अंगेनलुं
ठनंशंभोःप्रणामोपिचभक्तितः॥११॥स्वांगेभस्मत्रिपुंड्रादिधारणंमनुसत्तमैः॥रुद्राक्षधारणंस्वांगेकायि
काःशिवधर्मजाः॥१२॥शिवोत्सवालोकनाथंगमनंचनिवासिता॥वाचाधर्मःस्मृताह्येषरुद्रपंचाक्षरीजपः॥
१३॥शिवनाम्नाजपश्चैवस्तोत्रंशंभोस्तुवाचकः॥शिवधर्मोत्रकथितोबाचिकोयंमहेश्वरि॥१४॥नेत्राभ्यां
लिंगवीक्षाचशिवमूर्तेर्निरीक्षणं॥शिवोत्सवदिदृक्षाचचाक्षुषोधर्मउच्यते॥१५॥श्रावणोयंमहाधर्मः
शिवशास्त्रश्रवस्तथा॥शिवेशिवपुराणानांश्रवणंलेखनंविदुः॥मार्जनंपेषणंपुष्पाहरणंतोयपूरणं॥
मालाग्रथनमात्रोक्तंदीपधूपानुदापनं॥१७॥नैवेद्यपाककरणंशिवागारेगृहेपिवा॥पुष्पारामादिकरणं
गोपुराट्टालबंधनं॥१८॥आलयेकूपरवननंशिवावातीर्थानुबंधनं॥शिवलिंगोत्थतिःप्रोक्ताअष्टबंधवितान
तः॥२०॥महार्विष्टकपाषाणैःशिवागारानुबंधनं॥धातुपात्रोपकरणंशिवागारेप्रदापनं॥२१॥दृष्टवाहा

दिकरणं पुष्पस्यंदनकल्पनं॥ भेरीमृदंगतालानां तौर्यत्रिकनिवेदनं॥ २२॥ नाट्यांगनाप्रदानं च वीणादुंदुभिदापनं॥ वेदपारायणस्यार्थं ब्राह्मणानां च रक्षणं॥ २३॥ पूजार्थं देवदेवस्य पयोस्यस्तवनार्पणं॥ विल्वानां रोपणं देवि रंभाम्रामलकादिकं॥ २४॥ नालिकेरमधूकानां जंबीरवनरोपणं॥ पुंड्रेक्षुयवगोधूमशालिभूमिप्रदापनं॥ २५॥ गजाश्वोष्ट्रखराजाविगोवत्सादिप्रदापनं॥ धान्यागारादिकरणं शिवागारे महेश्वरि॥ २६॥ तद्रक्षणं वीक्षणं च तद्वृद्धिपरिकल्पनं॥ दासीदासप्रदानं च शिवक्षेत्रे तु शैलजे॥ २७॥ शिवार्चकानां भरणं धान्याच्छादनगोधनैः॥ भूषणानां प्रदानं च वस्त्राणां दापनं शिवे॥ २८॥ छत्रध्वजपताकाश्च चामरादर्शदापनं॥ दीपमालाप्रदानं च तैलैरपि च गोघृतैः॥ २९॥ पुष्पमंटपनिर्माणं पर्वकालेषु शांकरि॥ पंचामृतैः पंचगव्यैः लिंगबेरादिसेचनं॥ ३०॥ तथा फलरसैः पुण्यैः नारिकेराम्रपानसैः॥ जंबीरगंधकर्पूरइक्षुरभारसार्पणं॥ ३१॥ त्रिकालेषु तथा लिंगे प्रदोषपर्वणोर्द्वयोः॥ विषुवायनयोर्वापि संक्रांतिषु च पातयोः॥ ३२॥ षडशीतिमुखे वापि ग्रहणे सोमसूर्ययोः॥ महाभिषेककरणैः अभ्यंगकरणैः शिवे॥ ३३॥ यक्षकर्दमलेपैश्च दीपैः कर्पूरखंडजैः॥ ग्रीष्मकाले गलंतीनां प्रदानं शिवमस्तके॥ ३४॥ स्वर्णरौप्यघटैः पुण्यैः ताम्रपित्तलकांस्यजैः॥ मृद्घटैर्वा महादेवि शीतलांबुप्रपूरितैः॥ ३५॥ पाटलोशीरकर्पूरकरवीरादिवासितैः॥ गंधानुलेपनं लिंगे शिवागारादिलेपनं॥ ३६॥ शिववेश्मसु चत्वरे शीतलांबुप्रसेचनं॥ गात्राणि गुग्गुलु द्रुमधूपसौरभ्यकल्पनं॥ ३७॥ वीजनं तालवृंतैश्च मायूरव्यजनैः शिवे॥ तत्र पानकदानैश्च भक्ष्यभोज्यनिवेदनैः॥ ३८॥ दध्यन्नविनिवेद्यैश्च तांबूलविनिवेदनैः॥ ज्ञानसाहस्रधाराणां कलशास्नपनैः शिवे॥ ३९॥ सव्यदक्षिणशंखानां गोशृंगासेचनैरपि॥ कृसरान्नप्रदानं च शिवलिंगनिवेदनैः॥ ४०॥ नवरत्नाभिषेकैश्च नवधान्यासनार्पणैः॥ सौवर्णरत्नबिल्वानां पुष्पपत्रार्पणैः तथा॥ ४१॥ उत्पलासितमालानां प्रदानैश्चापि पार्वति॥ साहस्रबिल्वपूजाभिर्लक्षकोटिदलार्चनैः॥ ४२॥ नन्का

लोद्भवमुमलक्षाणामर्चनैःशिवे॥ ॥श्रीईश्वरउवाच॥ ॥एवंते शिवधर्मसारमखिलंप्रोक्तंशिवेनूनमप्यद्योक्तंचसु
गोप्यमप्यतितरांमत्प्रेमरुद्भक्तिभाक्॥ज्ञानंत्वेवकरोतिसत्फलमुमेभुंक्तेसकैलासगोमत्पार्श्वेगणपुंगवश्चसभवे
द्योदेवधर्मंचरेत॥४३॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरार्धेशिवगौरीसंवादेशिवधर्मकथनं
नामद्वितीयोध्यायः॥२॥ ॥श्रीईशानायनमः॥ ॥श्रीदेव्युवाच॥ देवदेवारविंदाक्षपूजितांघ्रिसरोरुह॥मलम
ध्यांतरहितसनातनजगत्पते॥१॥ शिवधर्मस्वरूपंमेत्वयोक्तंपरमेश्वर॥ शिवद्रोहःकिंप्रकारोवित्तशाद्य
शंकरः॥२॥ निस्तारहितःसोपिश्रोतुकौतूहलंमम॥ ॥स्कंदउवाच॥ ॥पार्वत्यैवंपुरापृष्टःकैलासपरमेश्वरः
तामुवाचप्रसन्नात्माजैगीषव्यशृणुष्वमे॥३॥ शिवद्रुहांस्मरणतोकंपतेमेमनोमुने॥तथापिशृणुवक्ष्यामिशि
वेनोक्तंश्रुतंमया॥४॥ मुनेत्वंगणपैःसार्धंदेवैर्मुनिभिरेवच॥ ॥ईश्वरउवाच॥ ॥शिवेत्वंशृणुकल्याणिशिवद्रो
हःसुनिष्ठुरः॥ यच्छ्रुत्वानमनोभूयाच्छिवद्रोहेमहेश्वरि॥५॥ विभूत्युद्धूलनत्यागःत्रिपुंड्राधारणंशिवे॥शि
वद्रोहःसविज्ञेयःप्रायश्चित्तविवर्जितः॥६॥ रुद्राक्षधारणत्यागःसर्वांगेषुमहेश्वरि॥ शिवद्रोहःस॰॥७॥ पंचा
क्षरजपत्यागःप्रसंगादपिशांकरि॥ शिवद्रो॰॥८॥ रुद्राध्यायजपत्यागःसर्वदादेविपूजने॥शिवद्रोह॰॥ ९॥शि
वलिंगार्चनत्यागोनित्यमेकाहमेववा॥शिवद्रोह॰॥१०॥ प्रदोषपूजनत्यागःसोमवारेष्टमीषुच॥ शिवद्रोह॰॥११॥
प्रदोषसोमभूतासुअष्टमीषुदिवाभुंजन्॥ शिवद्रोह॰॥१२॥ बिल्वपत्रार्जनत्यागोशिवलिंगार्चनायच॥शिव॰॥१३
शिवध्यानपरित्यागोहृदयेपरमेश्वरि॥शिवद्रो॰॥१४॥ मत्तिकालेपनःफालेनप्रकांचक्रांगकाःसदा॥शिव॰॥१५
भूतिरुद्राक्षहीनंचमहेशस्यैवपूजनं॥शिव॰॥१६॥ शिवलिंगादिसहितेमन्यदेवार्चनंशिवे॥शिव॰॥१७॥भू
तित्रिपुंड्रफालेपोदृष्ट्वामूढोनानंदति॥शिव॰॥१८॥रुद्राक्षधारिणंदृष्ट्वायोमूढोनाभिनंदति॥शिव॰॥१९॥पंचा
क्षरजपोसक्तंदृष्ट्वायोनाभिनंदति॥शिव॰॥२०॥रुद्राध्यायजपासक्तंदृ॰॥शिव॰॥२१॥अनालोकनमीशस्यअ

नभ्यर्च्यान्नभोजनात्॥ शिव०॥२२॥ अनिवेद्यान्नभोक्तारः जलं तांबूलमेव वा॥ शिव०॥२३॥ शिवनामपरित्या
गो विष्णुनाम्नां च कीर्तनं॥ शिवद्रोहः स विज्ञेयः प्रायश्चित्तविवर्जितः॥२४॥ शिवं यो मनुते मूढो विष्णुब्रह्मसमं
शिवे॥ शिव०॥२५॥ शिवरात्र्यन्नभोक्तारः शिवशैवव्रतेषु च॥ शिव०॥२६॥ शिवोत्सवश्चिवक्षेत्रे गमनालोकनोज्झि
तिः॥ शिव०॥२७॥ शिवालयध्वंसनं च शिवतीर्थस्य नाशनं॥ शिव०॥२८॥ शिवारामच्छेदनं च शिवकूपप्रपूरणं
॥ शिव०॥२९॥ स्नानीयहरणं शंभोर्गंधतैलादिहारिणं॥ शिव०॥३०॥ कदलीनारिकेलाम्ररंभाजंबीरहारणं
शिव०॥३१॥ शिवपूजोपकर्तॄणां हरणं परमेश्वरि॥ शिव०॥३२॥ शिवालये शिवारामे मलमूत्रोज्झनिस्तथा॥
शिव०॥३३॥ विनानाकरणं शंभोः रत्नसवस्य महेश्वरि॥ शिव०॥३४॥ शिवक्षेत्रसमत्वेन विष्णुक्षेत्रानुचिंतनं॥
शिव०॥३५॥ बिल्वानां छेदनं देवि पुष्पारामविनाशनं॥ शिव०॥३६॥ शिवे शिवपुराणानां निंदनाश्रवणं तथा
॥ शिव०॥३७॥ शिवनाम्नां विनिंदा च अन्यनामप्रशंसनं॥ शिव०॥३८॥ शिवभक्तविनिंदा च अन्यभक्तार्चनं मुदा॥
शिव०॥३९॥ अविमुक्तविनिंदा च ज्ञानवाप्यादिनिंदनं॥ शिव०॥४०॥ शिवोत्तमांगजातायाः गंगायाश्च विनिंदनं॥
शिव०॥४१॥ निर्माल्यफलपुष्पांबुसोमसूत्रस्य लंघनं॥ शिव०॥४२॥ शिवनिंदाश्रवे नित्यं हर्षेण परमेश्वरि॥ शिव०॥
४३॥ प्राणत्यागो देहिनां तु दर्शनात्स्पर्शनात्तथा॥ शिव०॥४४॥ निंदां च शिवभक्तानां तेषां वृत्तिपरिग्रहः॥ शिव०
४५॥ शिवभूम्यादिहरणे हारकाणामुपेक्षणं॥ शिव०॥४६॥ गव्यादिहरणं शंभोः तत्पयःपानमेव च॥ शिव०॥४७॥
रथाश्वगजगोजाविहरणं मारणं शिवे॥ शिव०॥४८॥ नैलापहरणं शंभोर्गंधमाल्यादिहारणं॥ शिव०॥४९॥ शिवध
र्मेषु विघ्नानां करणं मनसा शिवे॥ शिवद्रो०॥५०॥ शिवधान्यापहरणं शिवाच्छादनहारणं॥ शिवद्रो०॥५१॥ शिवस्व
र्णापहरणं रत्नानां हरणं मुदा॥ शिवद्रोह०॥५२॥ शिवदास्याभिगमनं हरणं परमेश्वरि॥ शिव०॥५३॥ शिववाद्या
पहरणं घंटानां हरणं शिवे॥ शिवद्रो०॥५४॥ शिवरक्षादिहरणं स्वगृहस्य च बंधनं॥ शिवद्रो०॥५५॥ शिवालये

तीर्थवरेमहामार्गस्यनाशनं॥शिव॰॥५६॥शिवभक्त्युपरोधश्चअशक्याशिवदर्शने॥शिवद्रोहःसविज्ञेयःपापश्चित
विवर्जितः॥५७॥श्रीईश्वरउवाच॥ ॥एवंशिवद्रोहरतात्मानांशिवेननिष्कृतिर्नापिचनिस्तरःसदा॥कदाचिद्दे
वाघनकल्पकोटिभिःतांदुर्गतिंवर्णयितुंनशेषः॥५८॥इयेसदादेविननारकोस्थितिंपश्यामितेषांननुसोरिलसकैः
॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरार्धेशिवगौरीसंवादेशिवद्रोहकथनेतृतीयोध्यायः॥ ३ ॥
श्रीईशानायनमः॥श्रीईश्वरउवाच॥ ॥शृणुदेविप्रवक्ष्यामिनानाश्चर्यविचित्रितं॥कादाचित्ममकैलासेशिवध
र्मप्रशंसनं॥१॥नन्कर्तृणांफलंदेविसेतिहासंवदाम्यहं॥सिंहासनवरासीनंचतुर्बाहुंत्रिलोचनं॥नवचंद्र
कलामौलिंपंचास्यंनागभूषणं॥अंबिकासहितंमातृस्कंदेभाननसेवितं॥३॥चामराभ्यांवीज्यमानंनरुणा
कैलसत्कृवि॥सुप्रसन्नमुखांभोजंपंचब्रह्माधिदैवतं॥४॥भासमानंखांगभासाकलधौतमहागिरिं॥नंदिभृं
गिमहाकालंचंडिनेदीशसेवितं॥५॥तुंडुंडहुंडुगणकैसौमनंदिसुनंदकैः॥वीरभद्रमहाभद्रदिव्यकालाग्निरु
द्रकैः॥६॥व्योमरुद्रमहारुद्रदेवरुद्रादिसेवितं॥कालभैरवसंहारभैरवाद्यभिसेवितं॥७॥कपालखट्वां
गधरमहाभैरवसेवितं॥नागहारमहापाशघंटामुद्गरशूलधृक्॥८॥चंद्रार्कसेरवरोन्नद्रासिमस्तकैरहिमन्यु
भिः॥गणेंद्रैर्वीरगणेंद्राभैर्मृगेंद्रसमविक्रमैः॥९॥तथान्यैर्गणवृंदैश्चनानावेषैर्दुरासदैः॥वानरास्यमुखैर्भी
मैस्तरक्षुवकगोमुखैः॥१०॥सर्पास्यैर्गजगोमायवश्वाखुमुखैःशिवे॥मयूरशुकमार्जारसूकरव्याघ्रवक्त्रकैः॥
११॥मत्स्यसिंहमुखैर्भीमैर्भोगिभूषांगभूषणैः॥पिचिंडिलैरूर्ध्ववक्त्रैःकरालैर्विकटैस्तथा॥ऊर्ध्वनासामहाना
सामहोष्ठैर्लंबकर्णकैः॥उन्नतैर्वामनैर्मुंडैःजटिलैःशरभास्यकैः॥भस्माभ्यक्तैस्त्रिपुंड्रांकैःसर्पहारैर्विभीषणैः
॥मुसलोलूखलधरैःशूलहेतिगदाधरैः॥१४॥बाणबाणासनकरैःव्याघ्रंबरधारकैः॥मृगत्वचालंकृतांगैः

वल्लकीहल्लकीकरैः॥१५॥ महाडमरुभेरीणां झांझरवटक्कासमस्वनैः॥ निःसाणमर्दलकरैः कपालावलिभूषितैः॥१६॥
रैत्यैंद्रामंपुराध्यर्थ्यैर्नामसार्थोप्रभावनः॥ प्रापुरेवं गणलैंभेनित्यं प्रहसनं मम॥१७॥ विनोदहेतुः कैलासे समते
योत्तमाः॥ नत्यंतिप्रहमंत्यन्येवादंतेगीनकौशलैः॥ मडुमडुभक्षल्लूकपटहानकगोमुखान्॥ हल्लकींवादयं
त्यन्ये हल्लीसंलास्यमाननुः॥१९॥ त्वयासहाहं कैलासे तान्नयाभिगणोत्तमान्॥ ततः कतिपये काले बहु
लेपरमेश्वरि॥२०॥ कैलासामूलभागस्थजंबूद्वीपभुविस्थिताः॥ भारते पुण्यवर्षे वै केचिद्भक्तवरा मम॥२१॥
चातुर्वर्ण्येषु विख्याता ब्रह्मक्षत्रविशस्तथा॥ शूद्रास्तथान्ये देवेशि शिवधर्मपाण्णिनन्वने॥२२॥ काश्यां कांच्यामवं
त्यां च अयोध्यामथुरासु च॥ पुष्करे च कुरुक्षेत्रे प्रभासे रुद्रकोटिके॥ कालंजरे महाकाले केदारे वनखंडके॥ प्रया
गे च श्रीशैले च चित्रकूटमहेश्वरे॥२४॥ त्र्यंबके चैव गोकर्णे श्रीशैले पुंडरीकके॥ श्रीकंठे चैव हालास्यरामेश्वरे वेणु
कानने॥२५॥ शुचींद्रे पापनाशे च पुण्ये चात्तरकोशके॥ रत्नाद्रौमात्तशैले च तण्ज्योतौ च जंबुके॥२६॥ घनस्था
ने च जप्येशे तंजे शेकुंभघोणके॥ मध्यार्जुने त्रिकोटौ च कुद्दाले च मयूरके॥२७॥ श्रीकायेयुघटेशे च श्रीवांछे च
जटासुके॥ वल्मीके वेदविपिने दुर्गेशे तेजनीवने॥२८॥ सुंदरक्षीरविपिने मंगले कंतुकेपुरे॥ ताम्रपर्ण्याः सह्य
जायाः पिनाकिन्यास्तटद्वये॥२९॥ गोदावर्याश्च कृष्णायाः हस्तिकानटयोर्द्वयोः॥ पयोष्ण्यायाश्च तुंगाया नर्म
दायास्तटद्वये॥३०॥ यमुनागंगयोस्तीरे रुष हत्यास्तटद्वये॥ अन्यासामापगानां तु तटयोः क्षेत्रजा नराः॥३१॥
शिवधर्मे विनम्रेते बहुपुण्यवशादुभे॥ एतस्मिन्नंतरे तत्र विमानवरमास्थिताः॥३२॥ नानाध्वजपताकाढ्य मु
क्तादामविचित्रितैः॥ अत्यर्कभासमानेश्च रत्नध्वजविभूषितैः॥३३॥ माहेश्वरैः गणैंद्रैश्च पूजितास्ते सुधि
षिताः॥ धूयमानाश्चामरौघैः वीज्यमानाश्च वीजनैः॥३४॥ रुद्रकन्यारताः सर्वे नाकिहस्तसुमार्चितैः॥ वेणु
वीणादिनिनदैः शंखमर्दलदुंदुभिः॥३५॥ वाद्यमानाः सुवर्णाद्य आनंदन्नभिनादिताः॥ जिनसभांबुधिर

गाः चक्षुःश्रोत्रसुखावहाः ॥३६॥ रुद्राणीनर्तनालोकैर्यांति नित्ये मेरुमस्तके ॥ चंद्रार्धमस्तकाः सर्वे भस्मपांडरविग्रहाः
॥३७॥ त्रिनेत्रा नीलकंठाश्च पर्यंयेनांकमलेक्षणे ॥ मत्कैंकर्यपरा नान्यैर्भोग्ये सेव्ये तेषु शैलजे ॥३८॥ जंबूद्वीपस्य कैला
से गच्छंत्येते मनोरमे ॥ नवकारूण्यलोके नं नेयां वासो भवेच्छिवे ॥३९॥ जंबूद्वीपस्थ कैलासे भक्तानां मम पार्वति ॥ म
त्सारूप्यं प्रपन्नानां ब्रह्मक्षत्रविशां शिवे ॥४०॥ ॥श्रीस्कंद उवाच॥ ॥ एवं कैलासशैले गिरिवरसुतया संवदन्नास्त
ईशस्तानालोक्य विमानरत्नप्रवरैः रुद्रैस्तपासंगतान् ॥ भक्तांस्तान् शिवधर्मवर्यनिरतानार्यासुखाभोरुहं पश्यंस्ता
न्भस्मभारं प्रवरदरथ मुने सेतिहासं मनोज्ञं ॥४१॥ ॥ इति श्रीशिवरहस्ये दशमांशे उत्तरभागे शिवगौरीसंवादे चतु
र्थोध्यायः ॥४॥ ॥श्रीईशानाय नमः॥ ॥श्रीपार्वत्युवाच॥ ॥ एते केन वसारूप्यं प्राप्य यांति महेश्वर ॥ जंबूद्वीपस्थ
कैलासं रुद्रैः संपूजितं वद ॥१॥ ईश्वर उवाच ॥ शिवधर्मपराः सर्वे एते भारतभूतले ॥ नानाजात्या नरा देवि मद्धर्मा
रणाभुवि ॥२॥ तेन रक्षिताः कैलासं समायांति सहस्रशः ॥ मत्सारूप्यधराः सर्वे पूजिता गणपुंगवैः ॥३॥ भोगभाजो
वसंत्यत्र यावत्कल्पावृतं शिवे ॥ शिवधर्मेत्र देवेशि भक्ता एवाधिकारिणः ॥४॥ ब्रह्मक्षत्रविशः शूद्राः श्रमणाः संकरा
स्तथा ॥ नैषधर्मवरत्रायमधिकारी निगद्यते ॥५॥ इष्टधर्मे व्याधिकृतानां ब्रह्मक्षत्रविशः शिवे ॥ तत्राप्यधिकृतो वेदवि
द्वान् दयोपसवी भवेत ॥६॥ तत्र वर्णाश्रमाचारः तत्र दुर्गेषु नान्यतः ॥ इत्थं सम्यक्प्रवृत्तानां वै कल्परहितं शिवे ॥
॥७॥ कर्म तन्फलति मे स्वर्गमात्रफलप्रदं ॥ फलांते पतनं भूमौ विकलं कर्म नो यदि ॥८॥ पूर्तोऽधिकारिणा मत्र
स्वर्गमात्रफलं शिवे ॥ वर्णस्थाद्योऽधिकर्मोत्र न विद्वन्नात्र शास्यते ॥९॥ स्वर्गपातांतफलदः पूर्ते धर्मोपि पार्वति ॥ स
र्वेषामेव वर्णानां भक्तिभाजां शुभे त्वतु ॥१०॥ शिवधर्मोधिकारोत्र प्रसादादेव मेंबिके ॥ संसारसागराद्धोरादुत्तार
कउदारकः ॥११॥ शिवधर्मोद्भुपः श्रेयान् गाणापत्यप्रदायकः ॥ जंबूद्वीपस्य कैलासदायको यं महेश्वरि ॥१२॥
मत्सारूप्यप्रदो देवि देवानामपि दुर्लभः ॥ देवापि भारते वर्षे प्राप्य भक्तलमुत्तमं ॥१३॥ समभ्यर्च्यैव मल्लिंगं शिवधर्म

कराभवन॥भूतले कर्म कृत्वैव स्वर्गालिं यांति मानवाः॥१४॥ कर्मभूमिरयं लोकः तत्र भारतमुत्तमः॥तत्र सर्वा
पगातीरे क्षेत्रेषु मुनिदेवताः॥१५॥ कृत्वेष्टापूर्तकर्माणि स्वर्गं भुंजंति पार्वति॥ शिवधर्मप्रभावेन देवतिर्यङ्नरा
भुवि॥१६॥ जंबूद्वीपस्थकैलासं समायांति गणार्चिताः॥ मम सारूप्यभाजो हि वसंत्ययुतकल्पकं॥१७॥ तत
श्च्युतान्नृपतयो भवंति भुवि भोगिनः॥ अष्टैश्वर्ययुता देवि अष्टमूर्तिरुपावशात्॥१८॥ ते तु वासनया भूमौ शिव
धर्मं वितन्वते॥ देहांते भारते वर्षे मत्सारूप्यमवाप्य च॥१९॥ जंबूद्वीपस्थकैलासे भोगभाजो वसंति ते॥तेषां
न सर्गवसतिः भवतेपानदायिनी॥२०॥ देव्युवाच॥ देवदेव महादेव महाकैलासवासिनः॥ न भवंति कथं सर्वे दे
वतिर्यङ्नरा भुवि॥२१॥ महाकैलासवासाय तव सामीप्यवर्तनं॥केन धर्मप्रभावेन भविष्यंति च न द्वंद्व॥२२॥
सुगोप्यमपि तद्ब्रूहि श्रोतुमिच्छामि तत्त्वतः॥ न गोप्यमस्ति मयि ते प्रसादेन वदस्व मां॥२३॥ देव्युवाच॥ प्रावृष्य
दुदयास्तघोरखरलसन्मस्तं विशालांतकं कंजाक्षासनभस्यमौलिजमहामाणिक्यमालाधरं॥कंजोद्भूतकपालजा
लविलसत्स्कंधप्रभाकंधरं कंदर्पांधकदारणं भजहरं चेतः सदाशंकरं॥२४॥ कटकूटगणैरभिष्टुतांघ्रिकरटि
त्वक्पटभूष्यसत्कटिं भज भूधरदारखेटदंष्ट्राविलसन्मौलिधरं हरं परं तं॥२५॥ ॥इति श्रीशिवरहस्ये ईशाना
ख्ये दशमांशे उत्तरार्द्धे पंचमोध्यायः॥५॥ श्रीईशानाय नमः॥ ॥ईश्वर उवाच॥ सम्यक्पृष्टं त्वया देवि रहस्यमि
दमद्भुतं॥ न चोत्तरसुधासिंधुसागरोर्मिपरिरंते॥१॥ महाकैलाससंभोलो तु निवासी को भवेत्प्रिय॥ बहुजन्मस
हस्रेषु चरस्थावरदेहिषु॥२॥ जरायुजांडजस्वेदउद्भिज्जेषु महेश्वरि॥ जात्वा नानामथ मर्त्यत्वं तत्र च विप्रत्वमंबि
के॥३॥ संख्यावतां च विप्रत्वे मयि भक्तिस्ततः परा॥ तया भक्त्यार्चनं लिंगे अनन्यसुरतुल्यता॥४॥ भस्मरुद्राक्ष
धारित्वं रुद्रपंचाक्षराश्रयः॥ शिवक्षेत्रनिवासश्च शिवनामजपः शिवे॥५॥ शिवनैवेद्यभुक्तिश्च नित्यं शिवक
थारतिः॥ एतेन क्रमयोगेन भक्तानामत्र सुंदरि॥६॥ भारते भुवि देहांते कैलासो दक्षिणो लभेत्॥ न चात्रोत्तरं कै

लासवासायाधिकतोभवेत्॥७॥ महाकैलासमौलौ तु निवसामित्वयांबिके॥ नचात्र चंद्रसूर्याग्नि प्रवेशोनानिलस्यहि॥८॥ कुतोदेवमनुष्याणां मुनीनां तपसापिवा॥ नलभ्योयं शिवेशैलो विष्णुब्रह्मादिदुर्लभः॥९॥ नविष्णोः नपसाशक्यः कैलासोधरणीधरः॥ नब्रह्मणस्तु तपसाशक्योयं नगउत्तमः॥१०॥ नवज्रिसूर्यवन्हीं दुवसवश्चिमरुतांबिके॥ गंधर्वयक्षरक्षांसि नागाविद्याधरादयः॥११॥ महाकैलासवासाय ईशास्ते तपअर्जितुं॥ नयागकोटिजफलं नद्दासेतुच्छमेवहि॥१२॥ नमहादानकोट्याचनद्दासोनैवलभ्यते॥ नकोटिकन्यादानैश्च नद्दासोनैवलभ्यते॥१३॥ गवांकोटिप्रदानेश्च न०॥ गजाश्वकोटिदानेश्च ल०॥१४॥ भक्ष्यभोज्यादिसंयुक्तैरन्नदानेश्चकोटिशः॥ नयागकोटिशो देवि नयमासनकोटिभिः॥१५॥ नकोटिमंत्रजाप्येनशक्योवस्तुं महीधरः॥ नवर्णाश्रमनित्यादिधर्मायनिशनैरपि॥१६॥ महाकैलासमौलौ तु शक्यतेवासअद्रिजे॥ नन्योलोमप्रसादेन निवसंतिमगांडजाः॥ नरवापिसदादेवितृणवल्लीद्रुमाअपि॥१७॥ पार्वत्युवाच॥ ॥कैलासमौलिवासोयं विष्णुनाब्रह्मणापिच॥ देवैर्महर्षिभिस्तत्वं नैर्नलब्धोमहीधरः॥१८॥ नंदिकेशादिगणपैस्तवसामीप्यवर्तिभिः॥ महाकैलासमौलौ तुवासोलब्धः कथंनुतैः॥१९॥ नश्चिवेदितुमिच्छामिवदमेकरुणार्णव॥ ॥ईश्वरउवाच॥ ॥नंदिकेशादिभिस्तत्वंत्वयानलानमीश्वरि॥ नविष्णुनाब्रह्मणावानदेवैर्मुनिभिस्तथा॥२०॥ नंदिकेशादिभिस्तत्वंतेनवासोत्र सर्वदा॥ त्रिकोटिरुद्राजाप्येननंदिकेशोनमस्यदं॥२१॥ तेनतल्लब्धं महादेविमल्लिंगस्यैवपूजया॥ चंडीशेनात्रवसतिः भृंगिणाचप्रदक्षिणैः॥२२॥ पंचाक्षरीकोटिजपाद्वीरभद्रेणचोलजे॥ दशकोटिनमस्कारैर्रुद्राद्यत्यातु हुंडकः॥२३॥ दधेद्रोमांसदास्तोत्रैस्तुवन्नापमहीधरं॥ ॥ईश्वरउवाच॥ ॥एवंमेगणपुंगवागिरिवराज्ञातेरहस्यार्चनैः संप्राप्ताधरणीधरंद्रमयनेतेनैवतेसर्वदा॥ मत्तारूप्यधरावसंतिनियतं मत्प्रेमभक्त्यागणानान्येषांविबुधायगम्यविषयः कैलासएवंविधः॥२५॥ ॥इति श्रीशिवरहस्ये ईशानाख्ये दशमांशेउत्तरार्धेषष्ठो

ध्यायः॥६॥ ॥श्रीईशानायनमः॥ ॥श्रीदेव्युवाच॥ ॥विश्वाधिकमहादेवविश्वाधारजगत्पते॥विमानवरमा
रूढायपूजितागणपुंगवैः॥१॥कस्तेनशिवधर्मज्ञारव्यानिंतत्कारिणोहर॥जंबूद्वीपस्थकैलासंप्रत्येकं तान्वद
स्वमे॥२॥ श्रीस्कंदउवाच॥ ॥इत्थंदेव्यातदापृष्टोनानालोकविमानगान्॥शिवधर्मपराना्हतेषांतद्धर्मका
रणं॥३॥ ईश्वरउवाच॥ ॥श्रणुदेविप्रवक्ष्यामिअवंत्यांयद्विजाधमः॥बहुयाचनकोनित्यंभार्यायाजीर्णव
स्त्रधृक्॥४॥ अवंतीपुरमध्यस्थोनित्यमेकाहभोजनः॥और्ध्वदेहिककर्माणिकारयत्येषपापकृत्॥५॥न
संध्यावंदितानेनपर्वण्यपिपरान्नभुक्॥नभस्मधवलालनलेनांगेरुद्राक्षमालिका॥६॥नरुद्रपंचाक्षरभाक्
नकृतंलिंगपूजनं॥नपंचयज्ञप्रवणःप्रवीणःप्रेतदानने॥७॥आद्यंनगोद्वयंतेनगृहीतंचसहस्रशः॥नित्यं
साहसकृन्मूर्खोभार्ययाप्रेतभोजने॥८॥लोकापहासभीत्यायंस्नातिनित्यंनदीजले॥सनित्यंसूतकान्नादी
देविपापवरोद्विजः॥९॥एवंस्थितेग्राममन्यंगतोभार्यासहायवान्॥सापिंडयभोजनंकर्तुंधनलोभेनशंकरि
॥१०॥मध्यंवनंप्रविष्टोसौदवभस्मांकितोभवत्॥भस्मनोधूलितोतत्रदंपतीधूममोहितौ॥११॥दवाग्निनातौ
मृतुर्नीतौचैवस्वतांतिकं॥शिवदूतैर्मोचितौचविमानवरमास्थितौ॥१२॥दिव्यभोगसमृद्धौचयातौकैलासम
धमे॥ ॥देव्युवाच॥ एतादृशोयंपापीयान्कथंकैलासमर्हति॥विचित्रंतेमहादेवचरित्रंपरमाद्भुतं॥१३॥॥
श्रीईश्वरउवाच॥ ॥अज्ञाननोप्ययमुमेदहांतेभस्मधार्यभूत॥ममाशेधूलितांगोयंविध्याबुध्यापिवर्जितः॥१४॥
किंपुनःसप्रभिर्मंत्रैर्धःस्नातिसितभस्मना॥नित्यंपर्वसुवादेविकिंपुनःकायनाशने॥१५॥तेनपुण्यप्रभावेन
शिवधर्मेणभामिनी॥भस्मांगमात्रतोयातिकैलासंदक्षिणांद्विजः॥१६॥सभार्यःपापनिर्मुक्तोपमेनापिप्रपूजि
तः॥यावत्कल्पमुषित्वासौराजाभवतिधार्मिकः॥पुनश्चशिवधर्मोग्निकृत्वाकैलासमेष्यति॥तत्पार्श्वगोभ्रा
जतेन्योवेश्यावेश्यासहायवान्॥१८॥पित्रामात्रापरित्यक्तोउज्जयन्यांवसत्तसो॥पित्रावाणिज्यलाभेन

धनंयत्नमुपार्जितं॥१९॥भोगार्थंव्ययवेश्यायेदत्वाधनमनाशयत्॥तेनविद्राविताःपित्रामात्राबंधुजनैरपि॥२०॥
भिक्षइत्वादिवानादिरात्रौचौरात्हेव्ययं॥चौरइत्वाधनंधान्यंवासोरत्नविभूषणं॥२१॥वेश्यायैप्रददात्येवंग्राम
पालैरलक्षितः॥कदाचिद्राजभवनेअंधकारावृतेनिशि॥२२॥भित्वाकोशागारंगेहेमंकटिसूत्रमपाहरत्॥
पावद्धेतुंसमुद्युक्तोनत्वालैरप्यनुद्रुतः॥२३॥तंराज्ञेदर्शयामासुःकटिसूत्रंकरेशिवे॥बध्वाकारागृहेराजा
वर्षमात्रमपानयत्॥२४॥राजासंप्रार्थितोवेश्यैःवैश्यपुत्रममूमुचत्॥छित्वाकर्णनासिकांचधावमानइतस्त
तः॥२५॥वेश्ययापिनिरस्तोसौनित्यमाह्वयणात्तदा॥निर्धनोप्ययमुन्मत्तोयातिस्मताडितःतया॥२६॥कदा
चिद्दैववशतोमंदवारेप्रदोषके॥रवस्यवेश्यांतंनीमहाकालेश्वरागतः॥२७॥धनत्रिपुंड्ररुद्राक्षांपीनो
न्नतपयोधरां॥समालिलिंगबाहुभ्यांसुहृदंगाढहृज्जनैः॥२८॥संताडितोमस्तकेप्यसवैवेश्यामतिमान्भवान्॥
नीतोनरकपुरंदूतैःयाम्यैस्तैर्नार्चितोप्यसौ॥२९॥पापमुक्तःसमायातिकैलासंदक्षिणंशिवे॥ ॥देव्युवाच॥ ॥
वेश्यासक्तःकथंवेश्योकैलासंप्राप्तवान्विभो॥वेश्ययात्रविमानेनतन्मेवक्तुमिहार्हसि॥३०॥ ॥ईश्वरउवाच॥
सवश्यवेश्यायवणिक्पतेःसुतोममारशोभोःसविधंप्रदोषे॥गाढंसमालिंगनतस्तदंगलग्नात्स्वसोजगतस्त्रिपुं
ड्रं॥३१॥दधन्नसोपापालनरकेस्वपदःतदाजहौप्राणमथोसवैश्यः॥यस्त्वंतकालेशिवसन्निधौमर्त्यविभू
तिपुंड्रैरपिमंडितांगः॥३२॥ममेष्यतिज्ञानवनोवरिष्ठोप्यज्ञाननोवैश्यसुतोयथायं॥तेनायमभ्येतिच
पापवर्जितःकैलासमेवेहनविस्मयस्त्वया॥३३॥कार्यःशिवेवैश्यसुतःसवैश्यात्त्रिपुंड्रमहात्म्यमिदंसुपु
ण्यदं॥३४॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरार्धेभस्मत्रिपुंड्रधारणमहिमासप्तमोध्या
यः॥८॥ ॥श्रीईशानायनमः॥ ॥देव्युवाच॥ ॥अत्यर्कभ्राजतेकोयंविमानोत्तममाश्रितः॥छादयन्मंड
लंभानोर्यातिरुद्रैःपरीवृतः॥१॥तन्मेवदामरश्रेष्ठअर्धेंदुकृतशेखर॥शिवधर्मप्रभावंतेश्रोतुंकौतूहलंम

म॥२॥ ॥ईश्वर उवाच॥ ॥गौडेषु नर्मदातीरे क्षत्रियः सोमवर्मकः॥ नाम्नाधनुर्धरो याति मृगयार्थे वनं
प्रति॥३॥पाशपाणिः श्वनां व्यूहैः मृगान्हंति रुरून्बकान्॥ बकान्छकान्कपोतांश्च व्याघ्रभ्रूदारगोमृगान्॥
॥४॥ एवं तस्य क्रियाकालो गतो मांसानि भुंजतः॥ कदाचिद्द्विपिनं याते तस्मिन्वै सोमवर्मणि॥५॥ धनुर्बा
णकरे हस्ती निपानार्थमुपाययौ॥ मदांधः करिणीव्यूहैः कलभैरपि संवृतः॥६॥ विलोक्य नर्मदां स्वैरं स्व
पुष्करजलैः करी॥ घर्मांशुकिरणैस्तप्तः धरणीरेणुरूषितः॥७॥ संस्पृष्टं पुष्करेणैव करेणुं कलभांस्तदा॥
स नर्मदाजलासारैः स्वांगतापमनीनशत्॥ तेनादृष्टः करिवरं गिरिशिखरवरोपमं॥ कर्णतालसमुद्भूतवायुना
धूतषट्पदं॥९॥ रुद्राक्षरक्षखंडस्कंधोजघाने केषुणा करिं॥ क्षत्रियेषु समाधूतोपमीनिर्दयनिरीक्ष्य
तं॥१०॥ दुद्राव क्षत्रियं तत्र पुष्करेण धृतस्तदा॥ पादेनाक्रम्य तद्देहं करी देहं द्विधाकरोत्॥११॥ भागं तु
क्षत्रियांगस्य रुद्राक्षद्रुममस्तके॥ स्वपुष्करेणोर्ध्वगं तं क्षेपयामास पद्मिराट्॥१२॥ सकेशलग्नशाखाग्रः
रुद्राक्षस्य तदा शिवे॥ रुद्राक्षबीजसंस्पर्शात्तद्देहस्यापसद्गतिं॥ विमानमध्यगो याति क्षत्रियोयं महे
श्वरि॥ संकरोन्योप्ययं पापी केदारशिखराश्रयः॥१४॥ व्याधो मृगजमांसेन संपोष्य स्वकुटुंबकं॥ मत्स्यान्
जालेन धृत्वायं तद्विक्रीयां गपोषकः॥१५॥ जीवत्ययं तहिंस्रोयं मलिनो मधुभ्रलभाक्॥ दाशैर्धनैः सदाना
वा तारयंजनसंघकं॥१६॥ आनरेः जीवते नित्यं लशुनाशी गुनारतः॥ कदाचिदेष पापीयान्नावासे तारयं
जनं॥१७॥ उन्मत्त गंगास्रोतेन नीतो नावा विभिन्नया॥ ममार दाशैः सजनैर्गंगांभः प्रपिबं[illegible]न्स्तदा॥१८॥
अन्योन्यकंठानालिंग्य तत्र भ्रेमन्निरे जनाः॥ तन्मध्ये कश्चिदास्तेन्यो रुद्राक्षस्रगलंकृतः॥१९॥ शूद्रस्तदा
लिंगनतो व्याधोयं गांगजेंभसि॥ मग्नस्तुत्र केशरेशूद्रव्याधो महेश्वरि॥२०॥ विमानेन समायातो रुद्राक्ष
स्पर्शनांबिके॥ गंगांभसस्तु पानेन रुद्राक्षस्पर्शनेन च॥२१॥ विमुक्तो घोरमायातो धूतपापो मनोरमे॥ एवादन्मो

संपिबन्मद्यं संगच्छन्नंत्यजामपि॥२२॥ पातकेभ्यो विमुच्येत रुद्राक्षस्रगलंकृतः॥ किंपुनःकायपतनेद
धरुद्राक्षमुत्तमं॥२३॥ समायाति चकैलासं सत्यमेवचनं प्रिये॥ ॥ ईश्वरउवाच॥ ॥देहांतेनविधृतंममा
क्षजवरं पापैर्विमुक्तोभवेत्॥ कैलासेगणपुंगवार्चितोप्यनुदिनं कल्पं तदाप्यद्विजे॥ राजाभूमितलेभवेदथ
शिवेरुद्राक्षसंधारणात्कोवावेदतथास्यजानमहिमाअज्ञानतोप्येवमे॥२४॥ ॥इतिश्रीशिवरहस्यईशा
नाख्ये दशमांशे उत्तरार्धे रुद्राक्षमहिमानामाष्टमोध्यायः॥८॥ ॥ईशानायनमः॥ ॥श्रीईश्वरउवाच॥ ॥
आनर्तविषयेकश्चिद्ब्राह्मणोवेदपारगः॥ ब्राह्मणान्तत्रतत्रत्यानध्यापयतिपार्वति॥१॥ वेदांश्चस्मृतिशास्त्रंच
तर्कंव्याकरणंतथा॥ मीमांसांसांख्ययोगौ चनाटकं चप्रहेलिकां॥ तस्यासन्बहवःशिष्यानानादेशयद्विजो
त्तमाः॥ तस्यभार्यागुणवती रूपयौवनसंयुता॥३॥ भर्तृशुश्रूषणरताशिष्याणांपोषणेरता॥ कश्चित्तत्रा
स्तिविख्यातोशूद्रोदेवीरूपीबलः॥४॥ त्रिपुंड्रुरुद्राक्षधरोबहुगुःशिवतत्परः॥ धनधान्ययुतःशूद्रःपं
चाक्षरपरायणः॥५॥ तत्रधर्मेश्वरागारेप्रातःसायंशिवागतः॥ पंचाक्षरंजपत्येवध्यायमानोमहेश्वरं॥६॥
एवंनित्यंस्थितस्यास्यतस्युरब्राह्मणस्यच॥ एककालेभवत्कालः जग्मतुस्तौयमंगति॥७॥ यमेनपूजितःशू
द्रोऽद्विजःपार्श्वेनिवेशितः॥ तत्रांतरेशिवगणैः विमानंसर्वतोज्वलं॥८॥ समानीतंतुशूद्रायतदारुह्यम
नोजवं॥ समायात्ययमीशानिकैलासंदक्षिणंमम॥९॥ विभ्राजमानोवपुषारुद्रवंदार्चितोप्यहं॥ शूद्रः
पंचाक्षरजपाद्ब्राह्मणादप्यरिच्यते॥१०॥ यममाहतदाविप्रःसुशर्माख्यःकृतांजलिः॥ ॥सुशर्मोवा
च॥ त्वंयमोधर्मवेत्तासिशूद्रःसंपूजितःकथं॥ ब्राह्मणंमांपवित्यज्यपंचयज्ञपरायणं॥११॥ त्वयासंपू
जितोस्म्यत्रकर्मणाफलभागहं॥ सुशर्मणोवचःश्रुत्वायमःप्राहद्विजोत्तमं॥१२॥ ॥यमउवाच॥ ॥पंचाक्षरपरः
शूद्रःकैलासंयातिसत्तम॥ पूजितोगणवृंदैश्चकल्पंतत्रवसेद्द्विज॥१३॥ तभूमौनृपतिर्भूयात्सर्वभोगसमन्वितः॥

शिवधर्मप्रभावोयंत्वंतुस्मृतिपरायणः॥१४॥ स्वर्गलोकंव्रजमुनेस्वर्गान्तेपतनंभवेत॥पुनश्चविप्रजातीयोभूत्वा
कर्मण्यथादृतः॥१५॥ पुनःपुनर्व्रजमुनेस्वर्गलोकंसुखावहं॥एवंस्मृतिपराणांतुस्वर्गमात्रफलंद्विज॥१६॥ धर्म
मेवंविजानीमिनात्रकार्याविचारणा॥नत्वंकैलासवासाययोग्योसिद्धिद्विजपुंगव॥१७॥ गच्छत्वंस्वर्गमेवाद्यभूद्रः
पंचाक्षराश्रयः॥तस्माद्गच्छतिकैलासंनेवतीसंस्मयोभवेत्॥१८॥ ॥यमउवाच॥ कोवावेदमहेश्वरस्यमहिमापं
चाक्षरीजापिनांसर्वाघाद्विप्रविप्रःस्मरदेवजपतांपंचाक्षरःपावनः॥त्वंगच्छाशुमुनेफलप्रदमहोस्वर्गंनयाकर्मिणां॥

६ थ

इत्युक्तोयमेनविप्रोनिलकोतूष्णीययौमानयन्॥१९॥ ॥इतिश्रीशिवरहस्येदशमांशेउत्तरभागेपंचाक्षरम
हिमानामनवमोध्यायः॥९॥ ॥श्रीईशानायनमः॥ ॥ईश्वरउवाच॥ ॥श्रीरुद्राध्यायमहिमाजापिनामभि
धिवर्तनं॥यजुर्वेदेचतुर्थेतुकांडेपावनउत्तमः॥१॥ शैवमंत्रमहारत्नरवनिरेवाप्यमुत्तमः॥सर्वपापक्षयकरःस्मृ
तिमात्रेणशंकरि॥२॥ महापातकपंचानांप्रमुखाकीर्णांहरस्ततः॥प्रायश्चित्तंजपोस्यैवश्रीरुद्रस्यैवमेंबिके॥३॥
ममनाम्नांसमूहोयंसर्वमंत्रोत्तमोत्तमः॥भस्मधारीजपस्यास्यअधिकारीप्रकीर्त्यते॥४॥ आमनंत्येवकेवल्याजाबा
लाआमनंत्यपि॥अथर्वणोप्यामनंतश्रीरुद्रमाहिमांशिवे॥५॥ सर्वैर्वर्णाश्रमैर्जप्यःप्रद्रुवजोमहामनुः॥ जपन्भू
द्रोमनुंरुद्रं नरकान्वैतितान्वयं॥६॥ ऊर्ध्वपुंड्रधरैर्नैवजप्योरुद्रोमहेश्वरि॥ जपन्द्विजोपिनरकंप्राप्नुयात्तत्रसं
शयः॥७॥ शनशारवागतामंत्राशतरुद्रा इतीरिताः॥ एतेषांजापमात्रेणमुच्यतेसर्वपातकैः॥८॥ सर्वायुर्दायको
मंत्रःसर्वरोगहरोमनुः॥सर्वपापप्रशमनोजपतांसर्वसिद्धिदः॥९॥ ममप्रसादजननोकैलासफलदोन्नणां॥अत्रेति
हासंश्रृणुमेपापनाशनमुत्तमं॥१०॥ अस्येतिहासश्रवणाद्रुद्राध्यायेमतिर्भवेत॥अविमुक्तपुराक्वश्चित्तुधर्मा
त्माद्विजोत्तमः॥११॥ गंगास्नानपरोनित्यंभस्मरुद्राक्षभूषणः॥रुद्राध्यायपरोनित्यंविश्वेशार्चनतत्परः॥१२॥
धनीमान्योवदान्यश्चपंचयज्ञपरायणः॥लिंगार्चनपरोनित्यंबिल्वपत्रैर्मनोहरैः॥१३॥ कदाचिदेवंवसतःतस्यका

रूपांमहात्मनः॥माघेमासिमहापुण्येशिवरात्रिःसमागता॥१४॥तस्यांरात्र्यांससंभारैःभक्ष्यभोज्यैर्महेश्वरं॥
विश्वेशमर्चितुंयातःपंचामृतघटैस्तदा॥१५॥क्षीरसर्पिर्दधिक्षौद्रनालिकेरांबुपानकैः॥जंबीरैसुल्यसारैश्च
गंधपुष्पाक्षतैरपि॥१६॥शर्कराबिल्वपत्रैश्चकमलैरुत्पलैरपि॥धूपैर्दीपैस्तथाविप्रोधोतयच्छंकरालयं॥१७॥
तत्रालयेलिंगपूजांकुर्वतांचद्विजन्मनां॥दीपानारोपयामासअन्नपूर्णालयेपिच॥१८॥निमंत्रयद्दशोविप्रोद्विजा
नेकादशोत्तरं॥विश्वेश्वराभिषेकार्थंगोहेमांबरदायनैः॥१९॥सुधर्मणाप्यर्थितास्तेकेचिद्विप्राधनाशया॥विश्वे
श्वराग्रतोदेवियजेयुस्तेशतरुद्रियं॥२०॥चतुर्थ्यपिचयामेषुविप्रैःरुद्राभिषेचने॥सुधर्मोप्यर्चयामासविश्वेश्व
रमकल्मषः॥२१॥शिवरात्र्यांसपर्याभिःषोडशैरुपचारकैः॥ततःप्रातःकृतस्नानोधनंगाःप्रददौमुदा॥२२॥
विप्रेभ्योरुद्रजापिभ्यःतत्रैकोनैच्छदीश्वरि॥ममाधिकाददस्वेतिदक्षिणामित्यथद्विजः॥२३॥सुधर्मोप्राहतंविप्रम
योह्युक्तातुदीयते॥नाधिकंप्रददाम्यद्यगच्छवानिवर्तनिच॥२४॥सुधर्मणोंदक्षिणांतांत्यक्त्वाक्रोधाद्ययौगृहं॥
सविप्रोप्याहसन्क्रोधंजाप्यंनप्रीयतांशिवः॥२५॥सएवंतेनविप्रेणनशिवार्पणकृताज्जपात्॥समापातिचकैलासं
धनेच्छात्यागतोद्विजः॥२६॥द्विजार्थमपिविमुक्तेपिरुद्रजाप्यपराद्विजाः॥प्रापुस्तेरुद्रपैशाच्यंघोरंवैधनलोभतः॥२७॥
तांदक्षिणांद्विजोन्यायमददेससुधर्मकः॥विमायसमलदादेविप्रसादार्थंममेवसः॥२८॥शेषेष्वन्येषुवर्षेषुरुद्रजा
प्यंधनार्थिनः॥तेषांद्विजार्थजाप्यानांकिंपुनःश्रूद्रसात्कृते॥२९॥नरकान्नैवविस्तारस्तेषांश्रूद्रार्थजापिनां॥
नकुर्वीतनकुर्वीतरुद्रमन्यार्थमीश्वरि॥३०॥नग्राह्यंनहुतंविप्रैःप्राणैःकंठगतैरपि॥वरमेवसुरापानंवरंगोमांस
भक्षणं॥३१॥वरंतुलादानधनंनरुद्राध्यायजापजं॥विप्राह्यसंकराद्यापिरुद्रजाप्यार्थमीश्वरि॥३२॥नग्राह्यंनैवजा
प्योपमन्यार्थंरुद्रउत्तमः॥नरुद्रार्थावगाहीयोपारीणोपिसमृद्धधीः॥३३॥रुद्राध्यायीसर्ववेदेषुनिष्ठःरुद्राध्यायीस
र्वयज्ञेषुनिष्ठः॥रुद्राध्यायीसर्वयोगेषुनिष्ठोरुद्राध्यायीमुक्तरूपेहदेवि॥३४॥ ॥इतिश्रीशिवरहस्येईशानसंपेद

२ भ. णुष्व ज्ञानतो गौरि ममनाम्नां च कीर्तनात्॥ वेश्यो वश्यं तु वेश्यानां मोक्षं प्राप चात्र हि॥१॥ ॥श्रीदेव्युवाच॥ ॥

शमांशे उत्तरभागे रुद्राध्यायमहिमा दशमोऽध्यायः॥१०॥ ॥श्रीईशानाय नमः॥ ॥श्रीशिवाय नमः॥ ॥श्रीशिव उ
वाच॥ ॥कस्मात्वयं वैश्यवर्योऽत्र तव नाम्नां च कीर्तनं॥ कथं च काराज्ञानेन तन्मे कथय शंकर॥२॥ शिवधर्मश्रवणतो विस्म
यो मम जायते॥ ॥देव उवाच॥ ॥मायापुरीति विख्याता बाहुदातीरसंगता॥ नरनारीगणाकीर्णा विपणावणशो
भिता॥३॥ नटनर्तकवेश्यानां संघशः परिसंवृता॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपि समन्विता॥४॥ धनधान्यस
मोपेता नानाश्रमनिषेविता॥ मुक्तिदा वसतां नृणां पुण्या मायापुरी शिवे॥५॥ तस्यां पुर्यां शिवस्थानं नाम्ना रुद्रेश्वरा
भिधं॥ तत्र रुद्रसरो नाम तीर्थमस्त्येकमुत्तमं॥६॥ तत्तोयस्नानमात्रेण नरो रुद्रगणो भवेत्॥ तत्तोयैः स्नपयेद्रु
द्रं रुद्रमंत्रैर्महेश्वरि॥७॥ मुक्त एकेन जन्मेन नयेक बिल्वार्पणेन च॥ तत्र स्नात्वा च पीत्वा च रुद्रं दृष्ट्वा च मान
वः॥८॥ मायापुर्यां महादेवि मायया मुच्यते विके॥ शिवज्ञानमवाप्नोति शिवेन सह मोदते॥९॥ तस्यां पुर्यामभूत्क
श्चिद्वैश्यो वेश्यावशंकरः॥ नाम्ना बक्षांगदो नाम्ना अभिषक्कर्मणि निष्ठितः॥१०॥ मूलिकातिलकं चूर्णं लहर्य पेयं च ले
पनं॥ एवमौषधजालानि संपाद्य स्वसुतैः सह॥११॥ वेश्यावीथ्यां चेटिकानां स्त्रीणां तु भगजीविनां॥ हास्यादि स्था
नगो भूत्वा समाक्रोशं क्वचिद्दृणिक्॥१२॥ वैश्य उवाच॥ ॥अपि वाताशिपर्णोऽशि वशंकरमहौषधं॥ मत्तोऽस्त्लोध
ममला पतयो वशगा हि वः॥१३॥ हे वेश्याः स्त्रलक्षिप्रं वशंकरमहौषधं॥ भुजंगा वशगा योद्य सर्वस्वं ते ददत्ययं॥१४॥
इति तद्वचसा सर्वे गृह्णंत्यौषधमीश्वरि॥ एवं वदन्नसतो वैश्यः कालेनाकिलतत्र वै॥१५॥ यमेन पूजितः पापैर्मुक्तोऽप्या
गाच्छिवे त्वत्र तु॥ शिववशंकरनाम्नां संप्रवादेनाप्यहर्निशं॥१६॥ अजानन्वैश्य एवायं किं पुनर्ज्ञानवादिनां॥ गोडा
रण्ये पुरा कश्चिद्व्याधः श्रीशैलमूर्धनि॥१७॥ धनुर्धरः पक्षिजालं निहंति च मृगान्बहून्॥ जालेन मत्स्यांश्च त्वेव भुं
क्ते क्रीणाति पापकृत्॥१८॥ पुत्रैः सह तदा व्याधः कालेनायतनुष्यये॥ पुत्रान्नु द्वोध्य एवं हि ममारोपो गिरेस्त
टे॥१९॥ प्रहराहरत क्षिप्रं मधुमांसमृगादिकं॥ हरशब्दोच्चारणे न मृतिकाले महेश्वरि॥२०॥ विमुक्तपानकोऽप्या

धः यमेनापिचपूजितः ॥ यानिदक्षिणकेलाशांनाममाहात्म्यमीदृशं ॥२१॥ ॥ईश्वरउवाच॥ मत्तिकालीनमन्त्रा
मस्मरणेनाघकोटयः ॥ प्रयांतिनलिकाघातघोषाद्विविधिहंगमाः ॥२२॥ कोवावेदमहेशानाममहिमासर्वाघनाशा
समानंदेहसुचिरंरमेनचरमावश्याचभ्रामासमा ॥२३॥ कामाशांतिपदाप्रभक्तिगरिमावेदांतसीमाशिवे भोमानंद
पदप्रदानपरमाव्योमावकाशप्रभा ॥ २३॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरभागेशिवनामम
हिमावर्णनंएकादशोध्यायः ॥११॥ ॥ श्रीईशानायनमः॥ ॥ईश्वरउवाच॥ ॥चित्रकूटेद्विजः पूर्वंसोमशर्मा
ह्वयःशिवे॥ पंचयज्ञपरोनित्यंस्वाध्यायनिरतः सदा॥१॥ कार्तिकेगच्छन्यथोतत्रचित्रकूटेश्वरालये॥ वर्षेणपी
डितोविप्रःपाकंचक्रेशिवाग्रतः॥२॥ सोमार्द्रोपानभूतायांनिशायांसशिवाग्रतः॥ मार्गयानेनदेवेनमासोभूया
णिकार्तिकः॥ ३॥ नधिदृवामसोतेनभोजनार्थंप्रतोज्वलं॥ शिवाग्रतोदधन्दीपंतज्वालोज्ज्वलकमंडपं॥४॥ सु
पाज्याप्लुतमन्नंचशिवाग्रेबुभुजेनिशि॥ द्विजोयंतेनपुण्येनव्याजेनागतःप्रिये॥५॥ इयंव्याधांगनाबाल्यस्वैरि
णीजारिणीतथा॥ पापिष्ठादुर्भगाचैवमधुमांससुराशना॥६॥ छिन्नेयंनर्मदातीरेवनेश्वन्यशिवालये॥ आग
त्यसापपेमाध्वीकंकुटंपललंत्वदन॥७॥ स्नात्वाविवसनंसायंनर्मदायांतदांबिके॥ दवभक्ष्यांगकातत्रसुरासव
विमोहिता॥८॥ ननर्तशिवलिंगाग्रेप्रदोषेयाममात्रके॥ सायंकालेननिधनात्यक्तपापायमर्दिता॥ रम्जमाना
विमानेषाराजहंसीवराजते॥ शिवाग्रेतुप्रदोषेत्रनर्तनाध्याननेतांबिके॥ किंपुनस्तोत्रवाद्येननृत्यतांकरताडनैः॥१०॥
अयोध्यायांपुराकश्चिदिंदुवर्माधवाहृजः॥ सगरेशास्तितिभुवंराज्ञःसेनापतेःसुतः॥११॥ इंदुवर्मासुवासैरंकांचि
द्वूपांसुसुंदरी॥ संकेतोपवनेस्थाप्यभद्रेश्वरशिवालये॥ रमतेप्रत्यहंतत्रधनंदत्वासुभूरिशः॥ राज्ञःसभायां
निशिथेतस्यसेवार्थवासिनः॥१३॥ याममात्रयंत्रियामायाःसमभूज्जनसंसदि॥ राज्ञाविसर्जिताःसर्वेसमायाताग
हंप्रति॥१४॥ चंद्रिकायांसगंधांगःपुष्पापीडोभटेनवै॥ संकेतोपवनंप्रापभद्रेश्वरशिवालयं॥१५॥ स्त्रक्चंदनेनपु

क्षेपणफलान्वे। क्षीनलैर्जलैः॥ सावेश्याचिरकालेन निद्राभंगेन मोहिता॥१६॥ इंद्रवर्मणमासाद्य क्रुद्धा मदनमोहिता॥ तदानीं तु द्वंद्वनं च पुष्पं तच्छीतलं जलं॥ प्रत्यूषे माघ धनुर्मासे तव पापुकोविशेषतः॥ लिंगे भद्रेश्वरास्ये सा पातयामास तज्जलं॥१८॥ चंदनं लिंगमौलौ तु सक्रोधा पातयत्सुमं॥ प्रसादितासा सुदती न दानीमिंद्रवर्मणा॥१९॥ बुभुजे कूसरान्नं सा प्राप्तं तांबूलमुत्तमं॥ भद्रेश्वराग्रतो देवि धनुर्मासस्य सूर्योदये॥२०॥ तेन पुण्याद्दिहायाता लिंगे चंदनदानतः॥ तच्छीतलांबुपुष्पाणां प्रदानेन महेश्वरि॥२१॥ विमाने नार्कवर्णेन वेश्या पाक्षत्रियनंदनो॥ भोगार्था ज्ञानतो देवि किं पुनर्भक्तिभावतः॥२२॥ ॥श्रीईश्वर उवाच॥ ॥एवं तवेशानि सदेव धर्मे शिवप्रसादं सुगुणं महार्थदं दीपप्रदातुर्निशि सोमवारे ऊर्जे शिवाग्रे प्रविनत्यनां तया॥ लिंगार्चकानां तु सुशीतलैर्जलैः स्रक्चंदनैर्वा मनसा प्यथान्यतः॥ फलं मयोक्तं विहितं मयैव प्रसादरूपः कथितोंबिके नव॥२४॥ स्वल्पोप्ययं नारयितुं भयार्णवान्नयात्कर्णधारः शिवधर्मरूपः॥ ॥इति श्रीशिवरहस्ये ईशानाख्ये दशमांशोत्तरभागे शिवधर्मप्रभावे द्वादशोध्यायः॥१२॥ ॥

श्रीईशानाय नमः॥ ॥श्रीईश्वर उवाच॥ शृणुष्वान्यामपि कथां शिवधर्मप्रशंसनीं॥ अज्ञानाद्दंदशूकेभ्यः पात्यसे महणार्चितः॥१॥ कैलासं दक्षिणे देवि देशस्यापूर्णो घलम्यकं॥ ॥पार्वत्युवाच॥ कोसावायाति यानेन भास्कर प्रतिमप्रभः॥ अनेन नेकथं दनागोस्त न्मे वद सुप्रभो॥२॥ ॥श्रीस्कंद उवाच॥ ॥इत्थं गिरिजया पृष्टः तामुवाच महामुने॥ कैलाशे गोमदस्याद्य अज्ञानेन शृणुष्व तां॥३॥ देव उवाच॥ ।शृणु पद्मपलाशाक्षि सिंधुद्वीपं कुरुजांगले॥ सर्वस्व हारि विप्राणामन्येषां तस्य कारुया॥४॥ नित्यं सा या ग्निकान्हत्वा न द्वैः स्वकुटुंबकं॥ संपोषयति धान्येश्च धनैर्देवि यथेच्छया॥५॥ स कदाचिन्निशि स्वैरं तमसादिशि संचरन्॥ जगाम राजभवने राज्ञो गां स समुपाहरत्॥६॥ विवत्सा धेनवस्तत्र तेन कालयता शिवे॥ हुंभारावोत्थिता गोपाः समुद्धताग्रायेन गाः॥७॥ तत्रैका जरती व्यंगा निर्मांसस्नायुबंधना॥ स गर्भा धावमाने न देवयि यत्निर्विसर्जिता॥८॥ तां जांगले स्वरद्वाविप्रात्र ईष्यालये स्वकाः॥ मासं संपोष्य तो घासैर्यधुः शूलवरांकि

नां॥९॥ तत्पोषणेन पुण्यां गीवत्सं श्चसमजीजनत्॥ दशरात्रेगते मह्यं तत्सिंचन् पय उत्तमं॥१०॥ प्रातर्नित्यं प्रदोषेषु तल्लिं
गामेचनात् द्रुमे॥ यावद्रोरोमसंख्यातो राजाचोरोपि पादजः॥११॥ उभाव ज्ञानतोगां मे दद तु ः किं पुनः शिवे॥ ममाभिषेकक
रणे कपिलां वान्यवर्णकां॥१२॥ दत्वा पितामहे स्वस्य शिवसारूप्यभाक् भवेत्॥ ज्ञानेन पयसा सिच्य लिंगे मे मंगलावहे॥१३॥
सो दशं स्नन्य पयसा पुनर्भूमौ न संभवति॥ वने दंभा तरोर्दैवि फलगुच्छमथाहरत्॥१४॥ विप्रपुत्रस्तु वैश्यायै ददाति प्रतिवास
रं॥ राज्ञः स्तूपवने तत्र सौराष्ट्रे च महेश्वरी॥१५॥ पयोष्णीतीरजाते पुवने पुरूदलीतरोः॥ कदाचि ग्रामपालेन दृष्टो
सौ विप्रपुत्रकः॥१६॥ गृहीतं पयस्तत्तस्य धावत्धावत रयसः॥ पर्कं तु कदलीगुच्छं तत्र सोमेश्वरालये॥१७॥ अपानय
धावमानः ग्रामपालैः र्विसर्जितः॥ प्रदोषकाले देवस्य अभिषेकं समाचरन्॥१८॥ तेन पुण्यप्रभावेन शिवलोकं प्रया
त्यसौ॥ नालिकेरफलं श्च इव बालो धर्मांशुतापितः॥१९॥ शून्यलिंगे न निर्भिद्य पयो बालः त्वार्दितः॥ तदंबुनाभिषि
क्तं मे शून्यलिंगं यवस्थितं॥२०॥ तेन पुण्यप्रभावेन शिवधर्मेण पार्वति॥ विमानेस्मू द्रबालोयं कैलासं याति पश्यपे॥
२१॥ ॥श्रीईश्वर उवाच॥ अज्ञानादैवतां कुरे गोप्रदाना द्रं मादानादैवचहे वाभिषेके॥ सन्नालिकेरांबुसुसेकमात्राद्बा
लोप्ययं याति शिवांतिकं शिवे॥२२॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवधर्मप्रभावे ना
म त्रयोदशोध्यायः॥१३॥ ॥श्रीईशानाय नमः॥ ॥श्रीईश्वर उवाच॥ ॥कश्चिद्गोपसुकेदारवनखंडे स्थितोभवत्॥
अजाविपालको नित्यं महिषीणां तथा गवां॥१॥ तेणुपुष्कलेष्वेवचारयन् गोपबालकैः॥ क्षीरं दधि घृतं नित्यं विक्रीणाति
सदापणे॥२॥ स तेन जीवने गौरि दधिभांडं समापयन्॥ शून्यलिंगं भुमिगतं प्रासवलत्तस्य पादयोः॥ दधिभांडपतद्विग्नं
तल्लिंगस्यैव मस्तके॥ दध्याभिषेकेनैवेशितस्याभूच्छिवसन्निधिः॥४॥ कश्चित्तस्करजातीयः वने पुष्पमधुशालिषु॥ पी
त्वा मधु प्रलिप्तेन मधूच्छिष्टेन घर्षयन्॥५॥ शून्यलिंगं वनस्थं तु रुद्रकोटौ ममेश्वरि॥ समधुस्नानरूढ्दिनि समानी
तोगणैर्मम॥६॥ घतं घटेन बिभ्रत्सः कश्चित्छूद्रकुलोद्भवः॥ वने भुक्त्वाशिवागारे ऊर्ध्वे उत्तानमग्रहुटं॥७॥ रूषाणस्यां

निशिशिवेरज्जुर्मूर्षिकरवंडिना॥ नष्टुटस्यघनाकस्यप्रापनल्लिंगमस्तके॥८॥ घताभिषेकस्तेनाभून्निशिपापक्षयाव
हः॥ तेनतत्पापमखिलंमदग्धंतत्रपार्वति॥९॥ लिंगतस्यदर्शनंपुण्यंदर्शनात्स्पर्शनंवरं॥ कृष्णाष्टम्यांनिशिशि
वेधतस्नानमघापहं॥१०॥ अयत्नलभ्यंतस्याभूःनिशिश्रद्धस्यतस्यवै॥ कृष्णाष्टम्यांशिवागारेअज्ञानात्स्वनसे
वनं॥११॥ मानहृष्टावबसिरवंचयथौक्षुद्रोघनग्नहः॥ कालेननिधनंप्राप्यममसारूप्यभागभूत्॥१२॥ इक्षुकांडं
हरन्कश्चिदिक्षुयंत्रकरोवणिक्॥ इक्षुसारघटोलिंगेप्रापतद्दैवयोगतः॥१४॥ इक्षुसारासेचनंचतल्लिंगस्याभ
वच्छिवे॥ माघांपर्वणिदेवेशितस्यभाग्यवशाद्ध्रुवं॥१५॥ तेनपुण्येनसवणिक्प्रयांतेसयमेबिके॥ काचिन्नारीभ्र
न्त्यालिंगेवनमध्येभयातुरा॥ शर्करासारमावध्यवनखंडेनदीजले॥ दुर्गमेपंकिलेमार्गेभ्रन्त्यलिंगेप्रपातयत्॥
१७॥ पिपीलिकाभयाद्धात्रौभूताभूत्तत्रभाग्यतः॥ तथातत्पुण्यमात्रेणविमुक्तासर्वपातकैः॥१८॥ घोतनयंनिविमा
नेनसमायातिमदंतिके॥ वाकेषुंशवेलनासक्तःसिकताभिर्नदीतटे॥१९॥ नर्मदायाः शर्मदायालिंगंवार्णाकि
तंशिशुः॥ प्राकारंगोपुरंकृत्वासर्वंससिकतामयं॥२०॥ वन्यपुष्पैर्वन्यफलैस्तत्रतंस्थाप्यपूजयत्॥ तेनाप्येतिवि
मानेनवृषभध्वजशोभिना॥२१॥ अहेस्वकाभिधेयःकुर्योन्धिवालयमनुत्तमं॥ गणैर्देवर्षिभिर्यातिकेलासंममपा
र्वति॥२२॥ ॥ईश्वरउवाच॥ ॥यःकुर्याच्छिवधर्ममेवमबलेज्ञानाद्यथाज्ञानतः॥ संस्पर्शेन्निखिलंदहेक्षुनवहः नद
तथापंरषः॥ भक्तेवममभवेतंस्यदधियांपापौघभित्केवलं केलासंप्रदरवनित्यकृतुकैः संसेवनीयोंबिके॥२३॥ ॥
इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवधर्मप्रभाववर्णनं चतुर्दशोध्यायः॥१४॥ ॥श्रीईशानायनमः॥ ॥
ईश्वरउवाच॥ ॥शृणुदेवीपुरांगेचशिवलिंगानिरिक्षणात्॥ केचिद्व्रजंतिकेलासंगणैर्देवैरभिपूजिताः॥१॥ कश्चिद्वि
प्रोदेवशर्मासुवानित्यंमदोद्धतः॥ स्रक्चंदनानिसंपाद्यतांबूलंधूपवर्तिकाः॥२॥ पित्रामात्राचकलहंकुर्वेनित्यंसदां
बिके॥ नाध्येतिशास्त्रमुक्तंचवेदांश्चस्मृतयोपिच॥ वेश्यासक्तेनमनसानित्याध्यायरतोपसौ॥ विस्मृत्यानध्याप

कालप्रदोषेष्वष्टमीषु च ॥४॥ चतुर्थ्यां च चतुर्दश्यां समम्यां सन्निशामुखे ॥ गुरवे न गत्वा नध्याये व्यर्धरात्रावधिप्रिये ॥
॥५॥ अजहस्तेश्वरस्यात्रे नृत्यंती वारसुंदरी ॥ तदा तस्यां दृष्टवेन अब्रूले श्वरविलोककः ॥६॥ एतेषु पुण्यकालेषु
अनाध्यायमिवाच्छिवे । पितरं वंचयित्वायं विरंतुमिच्छया ॥७॥ दृष्ट्वा पापिष्ठ हृदयो वेश्यासंगमलालसः ॥ अत्र
सोध्ययने प्राप्ते विलासासक्तमानसः ॥८॥ धूपं नदर्थमानीतं सं धूप्य च विशाग्रतः ॥ नर्तनं तेन सर्वेषपायेफलं पुण्यं द
दात्यसे ॥९॥ तयासक्तः सदुर्मेधा त्यक्तवर्णाश्रमक्रियः ॥ कदाचिन्निशिकाले तु शिवो दृष्टवदिदृक्षया ॥१०॥ तस्यामा
सक्तहृदयो पापादेदष्टभुजंगमः ॥ पितृगेहममारायसोप्यमायातिविप्रकः ॥११॥ विमाने स गुणाकारः साकार इव मन्मथः
॥ दिव्यदेहेन भात्येष भानुवच्छिवधर्मकृत् ॥१२॥ प्रदोषेष्वष्टमीष्वेवसप्तम्यां च चतुर्दशीं ॥ सोमवारे तथा सायं शिवलिं
गनिरीक्षणात् ॥१३॥ वेश्यासक्तेन चिन्तेन शिवदर्शिविवर्जितः ॥ अज्ञानाद्दर्शितामेषु पर्वसु नर्तनानि नां प्रिये ॥१४॥ तथा
न्योवैश्यपुत्रो यं चेटीवाटीप्रियः सदा ॥ तत्र यं गेश्वरागारे नित्यं नित्यं शिवोत्सवे ॥१५॥ साध्याणि बहूलं गृह्य वेश्या
केशसु धूपनं ॥ करोमीति विनिश्चित्य निद्रया पहतोभवत् ॥१६॥ तांबूलं नागवल्लीनां दलसाहस्रमुत्तमं ॥ क्रमुका
नां पंचपलं त्वक्लागारे शिवस्याहि ॥१७॥ जंबीरे पंचकं प्रातः तयायुक्तो पयोजयात् ॥ तन्मांटपगाते दृष्टवा शिवालय
विचारकाः ॥१८॥ तांबूलं विनिवेद्येशो सां म्राणिं धूपमानतुः ॥ जंबीरजरसेनेशं शिशिषिचुः तत्र तेर्चकाः ॥१९॥ तद्भागधे
यमुदभूत्यापीष्टवणिज्ञः शिवे ॥ सत्रवधनधान्ये नवर्धमानोथभूतले ॥२०॥ स्ववश्यवेश्यावेश्यपोसोरमनेमरमोहि
तः ॥ धूपतांबूलजंबीरदानेनाज्ञानतो मयि ॥ कालेन निधनं प्राप्य समायाति विमानगः ॥ मधुरायां पुरा शूद्रो मधुरेश्वर
मंदिरे ॥२२॥ क्रयार्थमर्थरत्नैश्च धान्यं संस्थाप्य विक्रयं ॥ करोति पणदानं णां हायने स धने छया ॥२३॥ दुर्भिक्षे च
तदा प्राप्ते नैवेद्यार्थं शिवायवै ॥ अचूचुरन्तत्र धान्यं शिवेन स्थ शिवार्चकाः ॥२४॥ विनिवेद्य तदास्तं निर्भद्र धान्यान्न
मीश्वरि ॥ एवं स्थितेनेन नरधान्यशूद्रेणैवं शिवार्चकाः ॥२५॥ ॥शूद्रा ऊचुः॥ ॥तद्धश्यनेमानहीनं धान्यं ममशिवार्चकाः॥

शिवालयस्थं स्वाधीनं भवतां प्रवदं तु मे ॥२६॥ तेर्वै काः प्राहु रेवं तं मूषिकै र्भक्षितं निशि ॥ न जानि मोत्र ते धान्यं
यथेष्ठं कुरु माचिरं ॥२७॥ तथ्यं लद्वचनं मान्यं धान्यं मेने समूषिकैः ॥ भक्षितं भिक्षुणा देवि मया प्राप्तं नदप्रिये ॥
तेन धर्मेण शूद्रो यं धान्यदो यत्निमत्पदं ॥ ॥ ईश्वर उवाच ॥ ॥ इत्थं प्रदोषे शिवलिंग लोकनात्सां प्राणि जं वीर
फलप्रदानात् ॥ धान्यप्रदानात्पादजविप्रवैश्याः क्रमेण याताः शिवलोकमंधिके ॥२९॥ ॥ इति श्रीशिवरह
स्ये ईशानाख्ये दशमांशे उत्तरभागे शिवधर्मप्रभावो नाम पंचदशोध्यायः ॥१५॥ ॥ श्री ईशानाय नमः ॥ ॥
ईश्वर उवाच ॥ विदर्भनगरे देवि उग्रेशाख्ये शिवालये ॥ नौं तु वायी ब्राह्मणी च रजकी वुरुडी तथा ॥१॥ वैधव्यं
गते यं तत्रैव बाल्ये वैधव्य तो मम ॥ उन्नता उन्नतकुचा जारतः किलसंगताः ॥२॥ व्याजेन शिवकैंकर्यमाले नुरताः
शृणु प्रिये ॥ ॥ देवी उवाच ॥ ॥ बाल्ययौवनदर्पांगा जारिण्यो विधवा हिताः ॥ शिवधर्मं कथं चक्रुः तन्मे वद म
हेश्वर ॥३॥ ॥ ईश्वर उवाच ॥ ॥ नास्तदामदमत्तांगय-पीनोन्नतपयोधराः ॥ नित्यं स्नात्वा न दीनो यं बंधुशा
पभयाद्गुमे ॥४॥ प्रातर्घटै र्जलं शीतं समानीय शिवालये ॥ शिवागारस्थितान्वृक्षान्नारिकेलमधूककान् ॥
५॥ बिल्वाम्रफलमादींश्च रंभाजंबीरजंबुजान् ॥ जलैस्तांश्च षकालेपि क्षालयं स्त्वाममारूयं ॥६॥ अवधेयं
स्तषाव्दसान्फलपत्रसुमांकुरैः ॥ पटसाधनसामग्रीं नौं तुवायीतु चातुरी ॥७॥ शिवाय वस्त्रं कर्पासं कृत्वा तत्र पार्व
ति ॥ ब्राह्मणी रंगवल्यासा शिवस्याग्रे त्रिकालये ॥८॥ पंचवर्णकपिष्टैश्च नानावर्णातु रंजितं ॥ पद्मस्वस्तिकपु
ष्पाणि च कार प्रत्यहं शिवे ॥९॥ वेश्या संमार्जनपरा शिवागारोपलेपनी ॥ रजकी शिवनिर्माल्यवस्त्राणां क्षालने
व्यधात् ॥ १०॥ भोजनार्थं समायांति रथ्यरहे ताश्च यः स्वयं ॥ एवं कैंकर्ययुक्तास्तानिशि जारेण संगताः ॥११॥ सम
कालमभूत्कालः नीतास्तासौरिणांतिके ॥ विचार्य शिवधर्मेन त्पूजितास्ते न नत्रै वे ॥१२॥ मयांतिता विमानेन
पश्य धर्मस्य सूक्ष्मतां ॥ तत्कराग्रांबुसेकेन वृक्षा पुष्टिमथाययुः ॥१३॥ तेन मल्लिंगपूजार्थे उपयोगो भवेच्छिवे ॥

यावत्तत्पत्रकुसुमफलबीजादिसंख्यया॥ तावत्कल्पायुतं भूयात्कैलासे वासनं द्विजः॥ नैवेद्यवस्त्रदानान्मेयावन्नं तु संख्यया॥१५॥ शिवलोकमवाप्नोत्येवमुक्तपापाशमानता॥ रंगवल्ल्यादिकरणाद्यास्तण्णाञ्चैव पार्वति॥१६
निशिवाग्रतः॥ यौवनेनच दृप्तांगी राजकीयेषु नर्त्यती॥ ३२॥ ब्रह्मक्षत्रविशः स्त्रद्दान् स्वांगसंगमलालसान्॥ सधनान्निर्धनान् चक्रे भ्रूविक्षेपादियं भुवि॥ ३३॥ सेन प्रसीसयोनीयं नि दृष्टे नकल्पमीदृशं॥ शिवार्चको यं पापीयान्भक्त्यार्चयन्निशाकरं॥ ३४॥ पंचामृतं पंचगव्यं निःशेषं नाभ्यषेचयत॥ किं चित्किंचित्से चयानो अधिकारिभयाधम॥ ३५॥ गर्भगेहाद्बहिर्भागे तैलंक्षीरं घृतं दधि॥ क्षौद्रं शार्करयासार्धं सुगंधं गंधपुष्पकं॥ ३६॥ स्त्रजः प्रफुल्लमल्लीनां वैधयाभ्यो दशाद्धिवार्चकः॥ अभिषेकाय रंभानां फलसाहस्त्रमुत्तमं॥ ३७॥ नालिकेरशतं कश्चिद्वणिक्मोदाद्धिवायतु॥ विचर्मकदलीजालं कुर्वन्नत्रासपादजः॥ ३८॥ प्रस्फोटाय नालिकेरांतु सेचनायघटं शिवे॥ क्षुधार्तश्चाप्ययं रंभाफलद्वयमभक्षयत्॥ ३९॥ नालिकेरं तथार्द्रौ सानपिबत्के चनेक्षितः॥ तेनास्त्रसूपयो ध्यास्ते भुषकंटः सदेवहि॥ ४०॥ रवंशिवद्रोहवतां गणिः परानकल्पसंख्यात्रनिवासिनांयम॥ ज्वालांगकावत्रचदीपनाशकेहिं जौसदावेदविदांवरिष्ठो॥ ४१॥ ॥ इतिश्रीशिवरहस्ये दशमांशोत्तरभागे शिवद्रोहकथने अष्टाविंशोध्यायः॥ २८॥ ॥ श्री ईशानायनमः॥ ॥ चित्रगुप्तउवाच॥ ॥ महाकाले पुराकश्चिद्दुर्गगोत्रोद्विजाधमः॥ शिवालये समागत्य साधुवत्समतलं पम॥ १॥ शिवरात्र्यां शिवागारे भस्मरुद्राक्षभूषणाः॥ लिंगमभ्यर्च्य यंरात्रौ महाकालेश्वराग्रतः॥ २॥ शिवभक्ता महात्मानो रात्रौ यामचतुष्टयं॥ तेषांपुष्पधूपणमियाद्वस्त्राण्येषां घटानपि॥ ३॥ अपहृत्य गतः पापः पंचत्वं समगतोन्यतः॥ शिवभक्तवरद्रोहाद्दधः शीर्षोर्ध्वपार्श्वतः॥ ४॥ कवाटमूले संस्थाय विप्रकन्याकरग्रहं॥ कुचामर्दी करोत्यापी काश्यांस्थित्वापि पापधीः॥ ५॥ प्रदोषकाले न द्रोहाद्दसिपत्रवने स्थितः॥ त्रिपुंड्रफालंवीक्ष्यैव निंदत्येष सुदुर्मति॥ ६॥ तेन न द्रोहेण नष्टायुः नरके यस वायसाः॥ न दास्यां नगीनोज्जिह्वां खंडयत्येव दुर्मनेः॥ ७॥ रुद्राक्षधारिणं दृष्ट्वा सास्य संसमुदीक्षते॥ शिवद्रोहेण नस्यास्ति तुदंत्याय सवायसाः॥ ८॥ रुद्रजाप्यविहीनावैरग्ले त्रैवु शिवद्रुहः॥ पातयंत्येव

नानकुधाः संनमाऽगिरिमस्तके॥ ९॥ पंचाक्षरो ऽभिनाऽप्नेतेन ह्रदे ऽभिधश्शलनः॥ पानयंनि भटानित्यं शिवद्रोहे
णनेन वै॥ १०॥ शिवद्रोहस्तथा केचित्स्याकारे मंटपे न था॥ मलमूत्रोत्सर्जनेन शिवतीर्थे नदीतटे॥ ११॥ शिव
तीर्थ शिवागार दूषकाय शिवद्रुहः॥ तेनांधार ह्रदे ऽप्नेति षष्ठं त्याभ्रनसंज्ञकं॥ १२॥ बिल्वार्चकोयं नित्यं वै शि
वदर्शनकारिणां॥ निर्माल्यबिल्वकूपणं का चार्थमकरोन्निशि॥ १३॥ सप्तवायं शिवद्रोही विश्वापूर्णह्रदे
स्थितः॥ निशीथे समनुप्राप्ते दीपमालामदाः शिवे॥ १४॥ दीपान्नाशयते पापी तेनेऽगृहागृहंगतः॥ संतप्तैने
लमध्यस्थः तेन पापेन भ्रद्कः॥ १५॥ गृहे गच्छन्निशीथे तु शिवसद्मगवर्तिकां॥ तैलाक्तास्यो ज्वलां गृह्य
गृहं याति सदा निशि॥ १६॥ शिवद्रोही च नियतं जीर्णैः संवेष्टयतं पटैः॥ तैलाक्तैर्दीपयं स्त्ये ने नतत्सर्वांगं
सदायम॥ १७॥ गंधपेषणरूपायं भ्रमणोन शिवालये॥ कर्पूरपलोपतं चौरयित्वांगलेपकः॥ १८॥
तद्रंगखंडशाखापि भटाः कृत्वा शिवद्रुहः॥ शिवालयस्थगोग्रासं अन्नं तु पकणान्यहूत॥ १९॥ चेटी
यं तेन पापेन स्थिता कल्पं मले ह्रदे॥ दधि मदात्य देवाय गोपोयं क्रयतः सदा॥ २०॥ अर्घ्यमूल्येन तेनात्र
सोयं श्लेष्म ह्रदे स्थितः॥ कश्चित्संकरजातीयः शिवधान्यमपाहरत्॥ २१॥ निर्भिद्यधान्यकोशं च तस्या
न्यानां च संख्यया॥ कल्पं सन रकेभुंक्ते यदंगारकणानयं॥ २२॥ शिववृक्षच्छेदकोयं जानन्सलोकमप्य
सौ॥ यावत्तत्पत्रकुसुमबीजमूलफलानि च॥ २३॥ तत्संख्याकं न दंगं चनि रुधाः छेदयंति वै॥ नालिकेर
मधूकानां फलबीजापहारकः॥ २४॥ यंत्रैः संपीडयते तत्र तद्रंगं खंडशो यम॥ जंबीरहारी देवस्य स्वगृहे
सोपदंशं कृतः॥ २५॥ तन्मांसखंडं न दृष्ट्वा उत्कृत्याथ नदंगतः॥ दशातियमदूतो सौत दात्र रुदनो निशं॥
२६॥ अप्रणम्य महेशस्य लिंगं तत्स्थो शिवालये॥ तेन द्रोहेण तन्मुंडं खंडयंति स्वदंडकतः॥ २७॥ भ
टाउद्भटशास्त्रेण शिवादर्शिनराः सदा॥ तन्नेत्रगोलके सूचीः पूरयंति दिवा नंशं॥ २८॥ एते शिवकथा

हीनश्रवणाःकुंडलैर्युताः॥ त्रपुसीसैश्च संतप्तैः श्रवश्चासिच्यते त्रवै॥२९॥ अयं सांख्यवतां मुख्य
स्तर्कैश्च शिवशास्त्रके॥ तत्रार्थर्वशिरोभागशिखाकेवल्यमंत्रकान्॥३०॥ विष्णूत्कर्षपरां चक्रे शिव
द्रोहपरायणे॥ सांख्यवांकल्पसंख्यातः जिह्वामुत्पाट्यवाप्यवै॥३१॥ संतप्तायससंदंडे ऊर्ध्वपुंड्रां
कमस्ययत्॥ अन्यपादैश्चसंतप्तैस्तत्कालं दाहयंतिवै॥३२॥ प्राकारे च शिवागारे निश्रेवं श्लेष्मणाक
रोत्॥ वेश्योयमत्र संतप्तक्रकचैर्दारितो भवेत्॥३३॥ शिवालयस्करषभैर्धोणीः संपूर्णधान्यकाः॥ क्रयरू
प्यापणेनित्यं वणिक्धान्यभृतिः शिवे॥३४॥ द्रोहीनेनान्नपापेन यावत्धोणीप्रसंख्यया॥ संतप्तवालु
कामध्ये शायानोत्रावतिष्ठते॥३५॥ शिवालये तृणं गृह्य स्वगोरक्षणमालनोत्॥ शिवद्रोहपमुन्मतस्त
दातत्तृणसंख्यया॥३६॥ संतप्तायासदूर्वाभिः पूरयंतिभटाः सदा॥ ॥ईश्वरउवाच॥ ॥एवं शिव
द्रोहपरायणानरासंदग्धसर्वांगकसंधिभागाः॥ विदारिताः शास्त्रसमुच्चकैः सदा निषंत्यत्र तंप
रिसंख्यवारकाः॥३७॥ ॥इति श्रीशिवरहस्ये दशांशोत्तरभागे शिवद्रोहकथने एकोनत्रिंशोध्यायः॥
२९॥ ॥श्रीईशानायनमः॥ ॥चित्रगुप्तउवाच॥ ॥अथापरे शिवद्रोहात्पतंतिनरकाणिवै॥ तान्शृणु
जगणेंद्रेशायमे नात्रसभासदैः॥१॥ जीर्णोद्धारे शिवागारे श्रमणो भेक्ष्यभोजनः॥ भिक्ष्ययाज्यैधनैस्वल्पै
दाहयाभासचेष्टकाः॥२॥ शूलहस्तेश्वरागारे जीर्णोद्धारणहेतवे॥ पिनाकिन्याःपुरातीरेपूजायत्वि
पदान्नधीः॥३॥ त्रिंशात्सहस्रसंख्याकाः सुधाश्चापेपयत्तदा॥ संपादयामासगुडं नवंस्वधनदानतः॥
४॥ तत्रराज्ञोभिषक्मुख्यः चित्रधर्मेतिनामतः॥ तदाश्रमणमाहूयशिवालयविचारकं॥ प्राहतत्रेष्टका
मसदशासाहस्रसंख्याकाः॥ प्रदेहिमह्यं च पणानि षट्काश्च सुधां तथा॥६॥ वर्षकाले अतीते त्वं शिवागारं
कुरुष्व वै॥ मद्गृणां गणसंस्तीर्णे पंकोत्रमम सद्मनि॥७॥ जायते हर्निशं तेन क्षिप्रं मे धववचः कुरु॥ श्रमणः

नद्वचः श्रुत्वातमुवाचतदाक्रुधा॥ ८॥ ॥श्रमणउवाच॥ ॥वर्षाकालेलिंगमूर्ध्निपतंत्यासारबिंदवः॥
तन्मूर्धमालयस्यात्रजीर्णोद्धारंकरोम्यहं॥ ९॥ भिक्षइत्वाधनंवैद्यसहैवापणिभिर्मया॥ प्रदास्याइष्टकाः
काष्ठैः नानाद्रव्यदरामिते॥ १०॥ गृहाणान्यत्रलधनः माद्रोहंकुरुशांकरं॥ शिवद्रोहेणनष्टंतेकुलंस
र्वंभविष्यति॥ श्रमणस्यवचः श्रुत्वावैद्यः क्रोधांधमानसः॥ उवाचक्रोधतोम्रासः श्रमणंशिवकिंकरं॥
१२॥ धनंत्रिपुंड्रुरुद्राक्षंप्रांजलिंपुरतःस्थितं॥ ॥वैद्यउवाच॥ ॥पश्यमेविक्रमंश्वः द्रश्वः परश्वस्तवेष्ट
काः॥ सर्वास्तान्नाशयाम्यद्याथपरश्वःप्रपश्यमे॥ १३॥ इत्युक्तोनिर्गतःक्रोधान्वैद्योराजगृहांतरं॥ राजप
त्न्याश्चगर्भिण्याः दत्त्वौषधमयंतदा॥ १४॥ शूलंकिंचित्समुत्पाद्य नचिकित्साम्सकारयत्॥ तत्रराजभ
टान्प्राहसमानीयनवेष्टकाः॥ १५॥ संचूर्ण्यपोटलैः तन्मेवस्त्रेराबध्यचूर्णकं॥ इष्टकानामिदानीं तु राज्ञ्याः
शूलविनाशने॥ १६॥ वैद्यस्यवचसाराज्ञोभटाः शास्त्रकराययुः॥ अलभ्यास्तत्पुरे तत्र इष्टकाः क्वापि
नूतनाः॥ १७॥ शूलहस्तेश्वरागारइष्टकाः समुपाहरन्॥ वणभैर्गोणिकाः पूर्यसंताड्यश्रमणंतदा
॥१८॥ निषेधकारिणंराज्ञोभटास्तेराजवाक्यतः॥ नीताराजभटैस्तत्रइष्टकाभार्यलत्रवै॥ १९॥ ज
हौप्राणान्श्रमणकः शिवद्वारितदाशिवे॥ संचूर्ण्यइष्टकाः सर्वाःकृत्वातेःपोटलंभिषक्॥ राज्ञ्याःशूल
चिकित्सांतुतिर्यगार्भाममारसा॥ तेनैवशंभोर्द्रोहेणराज्ञीनरकमागता॥ २१॥ आकल्पांगारशयना
क्रंदतेहर्निशंयम॥ अविचारपरोराजाकालेनायुगतोयम॥ २२॥ तेरवेऊर्ध्वपादोत्रधूमपोसावधो
मुखः॥ कशयाताड्यतेनित्यंसदायमभटैर्यम॥ राज्ञोभटाश्चपात्यंतेशिवागारेष्टकाहराः॥ वैद्योप्य
यंशिवद्रोहीमुख्यः शंभोर्द्रुहांवरः॥ २४॥ विषाग्निदग्धसर्वांगः तिष्ठत्याभूतसंप्लवं॥ उपेक्षकान्नपा
गारेसचिवामंत्रसूचकाः॥ २५॥ नावारयंतिराजानंपततंनरकार्णवे॥ शंभोर्द्रोहेणतेनात्रसंतप्तभुवि

संस्थिताः॥२६॥ शिवकार्यार्थमुद्युक्तः श्रमणोपि विमानगः॥ शिवार्थमत्यजत्प्राणान्तेन कैलासमाप्तवा
न्॥२७॥ ॥ईश्वर उवाच॥ ॥ महाभिषग्वेश्मनैवेष्टकाहरोभिषग्वरो यं न्टपतिश्च राज्ञा॥ त्वमंत्रिसे
नापतिभिस्त्वकैर्भटैः निमज्जसे नोनरकार्णवस्थः॥२८॥ ॥इति श्रीशिवरहस्ये ईशानाख्ये दशमांशोत्त
रभागे शिवद्रोहकथनेत्रिंशोध्यायः॥३०॥ ॥ईशानाय नमः॥ ॥ईश्वर उवाच॥ ॥चित्रगुप्तमुवाचा
थ न वीनो यं यमस्तदा॥ गणेशानच सभ्येश्च वाचाशिवशिवेति च॥१॥ ॥यम उवाच॥ ॥चित्रंप्रभाषसे
चित्रगुप्तत्वं वै कथानकं॥ त्रिनेत्रद्रोहिणां घोरं नरकं कः प्रपत्स्यति॥२॥ करणैः खंडशः कृत्तसर्वांगा मुंड
वर्जिताः॥ मुंडे रायससंस्कारैः आयसैः परिखंडिताः॥ कोदंडशरकांडैश्च दंडमंडलताडिताः॥ यमदू
तैश्च बहुशः कंकपेश्चविदारिताः॥४॥ चक्रकृत्ताः तथा केचित्केचित्मुसलमर्दिताः॥ मुद्गरैर्हन्यमा
नाश्च केचिदायसपिंडकैः॥५॥ भूषासु च प्रपच्यंते क्वाथ्यंते चकटाहके॥ सुतैलनप्रधूमैश्च कंदने के
त्र तान्वदा॥६॥ सर्वस्मान्नारकाद्घोरः शिवद्रोही यदुःखभाक्॥ यमस्य वचनं श्रुत्वा चित्रगुप्तोब्रवीत्तदा
॥७॥ सुनंदसंन्निधौ तत्र कथाम न्यां शिवद्रुहां॥ ॥चित्रगुप्त उवाच॥ ॥शृणुत्वमत्र द्रोहेण घोरे तेनिपा
तिताः॥ खंडशः कृत्तसर्वांगसंधिबंधा भटैर्यम॥ ८॥ विप्रायंनि पतेभव्या सौराष्ट्रे संस्थितः पुरा॥ उद्दा
लगोत्रसंभूतः नाम्ना भूतत्त्ववर्णकः॥९॥ मदोपवर्जितस्यार्चां करोति तिनिपमादय॥ केनचित्प्रार्थितो भुंक्ते
श्राद्धे चायं प्रदोषकृत्॥१०॥ धनलोभेन नत्रायं व्रतभंगाच्छिवद्रुहि॥ तदस्योदरमध्यस्य मंत्र जालं गुदे
हृतं॥११॥ स्वतुंडैः कंककाकाद्यैः निःसार्यैनशिवद्रुह॥ अयाज्ययाजको यं तु अध्वर्युरभवद्द्विजः॥१२॥
निषत्सु यज्ञवृक्षेषु बिल्वछेदनमाचरत्॥ सदायूपमिषात्पापी शिवद्रोह्यत्र पच्यते॥१३॥ तत्पत्रफल
संख्याक कल्पकश्चात्र पच्यते॥ संतप्तसीसमध्यस्थो अन्यो वस्त्रं तु शांकरं॥१४॥ दत्तं च वणिजात्रं भोरा

त्रावपहरन्तदा॥ तद्दस्त्रं नतु कल्पोत्थसंख्यया द्रोहभाक् विभो॥१५॥ महारौरवमध्यस्थः क्रंदते तत्र

दिवानिशं॥ पुष्पापहारी गंधानां स्पृद्रोरु द्रस्पवे यम॥ १६॥ काष्ठ्यते नेरुमध्ये त्र शिवद्रोही महाघकृत

कार्यान्तरे स्थितो भुंक्ते दिने कस्मिंश्चिदेकदा॥१७॥ शिवलिंगार्चनं त्यक्त्वा पापमुक् शिवद्रुहि॥ संत

४ स प्तार्यं शैलाग्रे संस्थितः क्रंदते निशं॥१८॥ शिवागारे पाककर्ता भक्ष्यभोज्यमचूचुरत्॥ शिवद्रोही तेन

पापेः संतप्तायसपिंडिकान्॥१९॥ संभक्षयति कल्पांते द्रोही चान्यः शिवस्यवैः॥ शिवगोरपहर्ता यंत

छलांकंचिनाशयवै॥२०॥ तद्द्रोमसंख्यया तेले संतप्ते क्वथ्यते निशं॥ शिवाभिषेकक्षीरेतु नीरदोप्यर्धहा

रकः॥२१॥ तेनत्र पुसुसंतप्तं पिबते कल्पमीदृशाः॥ नरः कश्चिच्छिवागारे लेख्यवस्त्रं धनं तथा॥२२॥

अचूचुरत्स गणशः तेन द्रोहेण पाच्यते॥ क्रकचे र्मर्दितशिरा वसते कल्पमत्रवै॥२३॥ नारी काचिदियं

श्रद्धा शिवागारे स्वकैर्विटैः॥ संगतेयं क्रूदघोरे रेतसः पतिता निशं॥ शिवागारस्थितं कीटं हत्वा

त्वागस्थितं यम॥ मक्षिकामशकं हत्वा सर्वजीवहनाघभाक्॥२५॥ तेनसंपेष्यते चात्र नरके पेष

णाश्मभिः॥ पादुकात्तः पदः कश्चिच्छिवागारे स्थितो भवत्॥२६॥ संतप्तायसमध्यस्थः पादत्राणेन

वाप्यसौ॥ उष्णीषीयं शिवागारे संस्थितः कंचुकी तथा॥२७॥ संतप्ताग्निमहाभारं वहते क्रंदते निशं॥

ते लात्रूपटमाबध्य कंचुकात्कंचदाहयेत्॥२८॥ ऊर्ध्वपुंड्राकितः शंभोरर्चा ने न कृता भुवि॥ तेन द्रोहेण

वैशंभोः तलेः संताडयतेत्र तु॥२९॥ चक्रांकेन समं शंभोरर्चनं चाकरोदयं॥ संतप्तायसपिंडेन हन्यते हर्निशं

संतप्तायसपिंडेन हन्यते हर्निशं नरः॥ ३०॥ ॥ चित्रगुप्त उवाच॥ ॥इत्थं शिवद्रोहपरं पराभिरासाद्य

तेयं नरकः सुघोरः॥ जंते सदायं परिपूर्णकल्पैः घोरैः सदा निबिडितोप्ययमालरावः॥३१॥ ॥इति श्रीशि

वरहस्ये ईशानाख्ये दशमांशोत्तरभागे एकत्रिंशोध्यायः॥३१॥ ॥ श्रीईशानायनमः॥ ॥ईश्वरउवाच॥

 चित्रगुप्तस्तदाप्राह शिवालयसुधाद्रुहः॥ तत्कथां च सुनंदाय यमाय च विशेषतः॥१॥ ॥चित्रगुप्त उवा
च॥ ॥अत्रार्यं पीडयते यंत्रे शिवद्रोही सुधाहरः॥ शंभोरंतर्गृहे भिन्ने तत्समीकर्तुमीहते॥२॥ व

णिक्कश्चित्सुधां तत्र संपाद्य स्थापयत्तदा॥ स्वगृहे लापनार्थाय तस्मै नादाद्वणिक्पमम॥३॥ ॥
वणिगुवाच॥ ॥शिवागारार्थमानीतां सुधेयं त्वं मुधा द्विज॥ याचस्यत्यंतसंपन्नो यद्यप्यंभोः सुधां क
थं॥४॥ शिवद्रोहो महानेष जानीषे न कथं द्विज॥ तमाह वणिजं तत्र ग्रामणीः क्रोधमूर्छितः॥
५॥ ॥ग्रामणीरुवाच॥ ॥पश्य मत्तो रुषं ह्यत्र सुधां न ददि नाशये॥ सर्वस्वहरणं ते द्यः श्वः पर
श्वो भविष्यति॥६॥ वणिक् श्रुत्वा पनद्दाकं तमाह विनयेन च॥ ॥वणिक्०॥ ॥यथा कथंचिद्देवास्तु
शिवालयकरोम्यहं॥ तं धेश्वरस्य देवस्य न सुधां तेददाम्यहं॥७॥ इत्युक्ता निर्गतौ तौ च यथामार्गं व
णिक् द्विजौ॥ ततः कतिपये काले समतीते तु ग्रामणीः॥८॥ रात्रिपालान्समाहूय वणिक्धनमचोरय
त॥ सुधां सुधरवेश्मार्थं प्रेषितां नवनीलवत्॥९॥ शिवागारसुधां सर्वां रात्रिपालैरचूचुरत्॥ समानः स्व
गृहं वीक्ष्य तस्य हृद्वणिजो वरः॥१०॥ सर्वस्वं चगतं वीक्ष्य न शुचो च तदा वणिक्॥ यथा सुधाहृतां वीक्ष्य
रुरोद विलुठन्भुवि॥११॥ ॥वणिगुवाच॥ ॥हा हतोस्म्यधनश्चोस्मि हा शंभो किं करोम्यहं॥ सुधां
सुधांशुधरते हृता ग्रामणिना बलात्॥१२॥ बलप्रभ यतस्त्वं वै सदारे वशिवद्रुहां॥ शिवद्रोही तत्फलं हि
भुनक्तु नरकार्णवे॥१३॥ नाहं पश्येय शिवधनं हृतं जीवाम्यिनक्कचित्॥ स्वपुत्रमन्यतो गच्छेत्युक्त्वा दार
पुत्रो वणिक्॥१४॥ स्वगृहं दाहयामास स्वशरीरं स वह्निना॥ तं दग्धमहदाश्चर्यं धूमज्वालावलां बशः॥१५

हा हेति चाव हन्यो राजा श्रुत्वा स्वमाहसं॥ विचार्य ग्रामणेस्तस्य गृहं सर्वमलुंठयत्॥१६॥ छिन्न ह
स्तपदां न चक्रे ग्रामपालांस्तदा नृपः॥ निःसारयामास पुरात्सदारान्स सुतांस्तदा॥१७॥ शिवार्थमत्य

जन्मप्राणान्यणिग्यातिविमानगः॥ राज्ञा न मारितो यस्माद्द्विजरव्वेति वै भयात्॥१८॥ संग्रामणीः शिव
द्रोही तेन न भुंक्ते व यातनाः॥ राजायं तत्प्रबोले पुग्रामणे किं वदाम्य हं॥१९॥ रात्रिपाला इमे सर्वे सुधाहाराः
शिवालये॥ अधोमुखो ध्वेपादास्तैलं बतेर्घ्नं खलापदैः॥२०॥ संतप्रवन्हि ज्वालांगा दह्यमाना दिवानि
शं॥ हाहेति क्रंदमानाश्चरति धंत्याभ्रुतसंभ्रमं॥२१॥ कश्चित् क्षुद्रः शिवागारे ईक्षु दंडान् वर्धयत्॥ शिवस्ये
वाभिषेकार्थं न क्रयार्थं न दाभुवि॥२२॥ सेनापते र्महामात्रः याचते तं न दैक्षुकं॥ न ददाति शिवस्येति
सदा तं प्रतिषेधति॥२३॥ कदाचिदयमुन्मत्तवारणं द्रमधिष्ठितः॥ धावंतं मदधाराक्तं घ्नं खलाबद्धपाद
कं॥ इक्षुकांडानि शिरसा धारयानं च मार्गगं॥ शिवस्याभिषेकार्थेश्च दृष्ट्वा गच्छंतं भीष्यसः॥२५॥ सक्रोधे
नैव मनसा गजं तं समचूचुदत्॥ स्वांगुष्ठेन गजस्येष कर्णमूले तदायम॥२६॥ सपुष्करेण धावंतमग्रहो
त्स महाबलः॥ धावंतं सेक्षुशिरसं भ्रद्रमालूयसन्मुखे॥२७॥ विदारयामास रदैः निर्यजिज्ज्वंगता
सुकं॥ तं च दृष्ट्वा मृतं श्रद्रं धावंत्यन्ये जनाः पथि॥२८॥ शिवेक्षुकांडानि गजस्तस्मादाचाप्य भक्ष्य
त्॥ स्वगं जनमदान्के न मारितं श्रद्रमीक्ष्य चा॥२९॥ सोध संस्कोभ महामात्रमपृच्छत्तस्य कर्मतत्॥ ॥महा
मात्र उवाच॥ ॥मदाविलोमदाविद्धोस्तणिभिन्नो तमांगकः॥ नमद्दर्शं समापातिहतः श्रद्रः करोमि
किं॥३०॥ तेनोक्तो मोन मादभ्रेमत्त्रसेनापतिस्तदा॥ संबधो लानमध्ये तु वारणो सौ जनायपुः॥३१॥ सशं
भोद्रोहकर्तायं महामात्रोप्यसौ द्विपः॥ उभावाकल्पपर्यंतं बुभुजाते त्रयातनाः॥३२॥ तानस्म र्तुं च
मनसाशक्यं ते त्रगणेश्वर॥ श्रद्रोप्ययं शिवं पाति विमाने नार्करोचिषा॥३३॥ ॥ईश्वर उवाच॥
सुधांशुधकृधामसुधापहारकः संग्रामणीर्भूपतिरत्रपालाः॥ आधोरणप्रेरणतः सवारणो भुंक्ते सदा वै
नरकं सवारणः॥३४॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवद्रोहकथने द्वात्रिंशोऽध्या

य॥३२॥ ॥ ईशानाय नमः॥ ॥ चित्रगुप्त उवाच॥ ॥ कश्चित्सोमेश्वरागारे जीर्णोद्धारणहेतवे॥
अश्मनां शकटीभारैः लुलायवहनैस्तदा॥ ३३॥ टंककाराः शिवागारे प्राकारं तं बबंधिरे॥ तत्र कश्चि
च्छिलाखंडं खरा हृपेषणाय वै॥३४॥ अनयच्छिविरे स्वस्य सिलां तामसिनीं तदा॥ शिल्पा ऊचुः॥ ॥
प्राणतस्ते समुत्थाय चुक्रुशुस्तां शिलां गतां॥ देवालयाधिपतये न्यवेदन्छिल्पिनस्तदा॥ ३५॥ तदा शि
लां तदैवान्यां आरोप्य न तत्र तेस्तदा॥ प्राकारमध्यगां चक्रुर्देवाश्म आहारकोप्ययं॥३६॥ भ्रूद्रुः पाषाणक
णजसंख्ययानरकार्णवे॥ अश्मनस्तस्य चूर्णानि स्वादन्नास्ते सुदुःखितः॥ ३७॥ अत्रान्यो घृतहा
र्यत्र शंभोर्नित्यं चरेच्च ने॥ घृतादस्तेन पापेन शिवद्रोही निपातितः॥ ३८॥ संतप्तं च घृतं नित्यं पिब
तेत्र हि पातकी॥ अथान्यो क्षेत्रहार्यो यः शंभोरंभोजकल्पके॥ ३९॥ निपातितोयं पापी यातनया मासां
शतसंख्यकं॥ यावत्क्षेत्ररजःसांकणानां स कणादनः॥४०॥ सर्वदा भ्राष्ट्रमध्यस्थो रुदते हर्निशं
मम॥ शिवमाल्यापहारोयं धर्मेपि शिवसद्मनि॥ ४१॥ शिवालयवितानानि रथ्यशोभावहान्यपि॥ वस्त्राणि
मंडपे बध्य विवाहे छिद्रभादधत्॥४२॥ स तुन्नवायी रत्नीभिः सूचीचक्रे न सूत्रकैः॥ शिवस्य नारिकेराणां
गुच्छमाबध्य मंडपे॥४३॥ कदलीफलखंडं च ईक्षवः पूगजं फलं॥ बध्वा मंडपशोभार्थं विवाहानंतरं मुदा॥
४४॥ अधिकारी शिवद्रोही विक्रिणात्यापणे ददत्॥ पणानानीय न शिवं ददौ गृहान्स्वयं तदा॥४५॥ ते
न पापेन तत्कन्या विधवाभूद्दरिद्रिणी॥ सोपि काले न निधना हृग्धां गोप्यत्र निपतति॥४६॥ शिवमंडपद्वा
र्यत्र शेतेः संतप्तवालुषु॥ कश्चिद्राजसुतो वीरैर्भटै रक्षप्यधिष्ठितः॥४७॥ धावन्नाखेटके मार्गे मृगान्ह
त्वान धांडजान्॥ सायं परिभ्रमंस्तत्र कंटकाविद्धपद्द्वयः॥४८॥ भ्रमन्नेशालयं प्राप्य मार्गमध्ये स्थितः
तदा॥ क्षुधितैः स्वभटैश्चैव स्वयं क्षुत्तृट्समन्वितः॥ ४९॥ तैलं शिवाभिषेकाना मालकस्थैरुपार्जितं॥

जंबीराण्यपि तत्रैव स्थितानि शिवसेचने॥५०॥ तान्यानीय बलात्कारात् जंबीराण्यपि तेन कं॥ पा
दकंटकमुत्पाट्य तत्र तेन जलं फलं॥ ५१॥ गृहीत्वा पादमर्दं च कृतवान् राजपुत्रकः॥ भोक्तुं नैवेद्यमी
शस्य अनिवेदितमेव हि॥५२॥ स्वपटे रानयामास समतं दाचे क्षुधातुरः॥ अन्नं त्यक्त्वात्र देवाय नैवे
द्यं क्रियतामिति॥५३॥ आरेव टकैर्भटैर्पुत्रो बुभुजे नन्दनपात्मजः॥ तेन पापेन नष्टायुः यममागान्न
पात्मजः॥५४॥ तेर्भटैः सहसंतप्तं तेन मध्यस्थितो निशं॥ अनिवेद्यान्नपुलकान्यावदस्मातिवे भुवि॥
५५॥ तावक्ति भिगणान्भुंक्ते शिवद्रोहयमीदृशाः॥ अत्रोप्यस्ति हि जारा ज्ञाभटाभटकशाहताः॥नि
पात्यंते तत्र नियतं तन घुणुष्वगणेश्वर॥ कश्चिद्गेयम् राजा नाम्ना चित्रांगदो धनी॥५७॥ मानीमा
न्यो वदान्यश्च धनधान्यसमन्वितः॥ स नित्यापुन विप्राणां भोजनं दापयन दशा॥५८॥ शिवालयेत्र
तं धीशा धाम्नि विस्तन मंटपे॥ भक्ष्यभोज्यान्नपनसरं भा फलसमन्वितं॥५९॥ भुजंतां तत्रवि
प्राणां तत्रन्यून मभूत्फलं॥ रंभांम्रपनसादीनां शिवागारस्थितं फलं॥६०॥ अग्रहन्न ब्राह्मणभु
जिक्रियार्थान्नेन पाज्ञया॥ नदादातुं शिवागारस्थि तायेत्र शिवार्चकाः॥६१॥ शिवार्चकाः०॥ ॥ लो
गीकुर्मीत्र देवस्य फलहारणभीदृशं॥ न ब्राह्मणेषु दानं च शिवद्रव्यं महाघकृत्॥६२॥ तेषामुक्त्वा
नामेव शिवसेचनसाधनं॥ प्रदद्बुस्ते फलं हित्वा ब्राह्मणेभ्यो ददुर्भुजि॥ यद्यथं बुभुजुस्ते पिरं
भाम्रफनसोद्भवं॥ शिवाभिषेककरणं अशुंसंतेन पं हि जाः॥६४॥ नष्टायुषस्ते शंभोर्वै द्रोहं तन्नादनतो
द्विजाः॥ राजापि कालान्निधनं प्राप यातो भटैः स्वकैः॥६५॥ फलाहरणतः शंभोर्ब्राह्मणाय तु भोजि
ताः॥ एकस्मिंदिवसे भूमौ रंभापनसजाम्रकैः॥६६॥ तत्रैव नरके घोरे पात्यंते क्रूरकर्मिणः॥ महोद
रास्ते गुरुतो शिरां त्राणि चलुं जते॥६७॥ काकैः संतुद्यमानां गा वज्रतुंडैरथार्दिताः॥ तत्र गोलकसं

धोचकर्णकं ठेषुपादयोः॥ ६८॥ अयुतंतंनियुतंनं घोरं नरकं चोपभुंजते॥ छेत्तारः फरुषंडानां करालक
रवालतः॥ ६९॥ छेत्स्यंति नत्कराण्यत्र राज्ञोभटकराधिकं॥ राजाप्ययं क्रोशमानः ककचैर्मूर्ध्निभिद्य
॥ ७०॥ राज्ञश्चाज्ञाकरां जिह्वां संतप्तायसदंडतः॥ सदंशानः समुत्पाट्य पातयंतिमहाह्रदे॥ ७१॥ शिवा
गारोछित्तिकरो राजा ब्राह्मणभोजनात्॥ ॥ चित्रगुप्तउवाच॥ ॥ शिवद्रुहो यत्र वसंतिमानवाः सुदु
खभारे नरकाग्नितप्ताः॥ एतेमयोक्तास्तव सत्यनंदन शृणुष्व चान्यानपिपापिनां वरान्॥ ७२॥ ॥
इति श्रीशिवरहस्ये ईशानाख्ये दशमांशेनरभागे शिवद्रोहकथने त्रयस्त्रिंशोध्यायः॥ ३३॥ ॥ ईश्वर उ
वाच॥ ॥ चित्रगुप्तस्तदाप्राह सुनंदं च गणेश्वरं॥ प्रांजलिर्विनयोपेतः तत्रसंसदि वै कथां॥ १॥ शिव
द्रुहांमुमेतत्र शिवभक्त्यपहारिणां॥ ॥ चित्रगुप्तउवाच॥ शृणुध्वंभक्त्यहं तृणांशंभोरत्र प्रतिक्रियां॥ प
श्यंतेविकलायेतेविप्रावेदविदांवराः॥ २॥ हातायं मिथिलाधींद्रः सूर्यशर्माकविप्रियः॥ द्विजाः प्रति
ग्रहपराः पीड्यंतेनिलयं त्वके॥ ३॥ उक्तो यांतिदिवारात्रं पिबीभत्सारक्तदं नरे॥ भ्रमंतियंत्र परितेखरा
णां ज्ञातकं यम॥ ४॥ रक्तापुरितमेनत्द्वैतिलयंत्र मुखं मुहुः॥ तेषामास्ये पाययंति पूयं रक्तं त्वपं द्विजान्॥ ५॥
तेषांमध्येप्यसंख्याकं सख्यचानयमुखतः॥ शिवनिंदां च करासौमिथिलेशाग्रतोभुवि॥ ६॥ ॥
सुनंदयमौ०॥ ॥ अहोदुःखमहोदुःखं एतयोर्न पविप्रयोः॥ श्रोतुं नशक्यते द्रष्टुं किंपुनर्मोसचसुषा॥
॥ ७॥ एतेषांचद्विजानां चनपस्यचविशेषतः॥ क्षेत्रप्रतिग्रहीतृणांशिवभक्त्यपहारिणां॥ अभूत्कथं
वदस्वाद्य तन्नोशृण्वावसादरं॥ ९॥ श्रुत्वावचोचित्रगुप्तः तयोर्यमगणेशयोः॥ उवाचप्रांजलिर्भूत्वा
नृपविप्रशिवद्रुहः॥ १०॥ यमपूर्वे सूर्यवर्मामैथिलेशो द्विजोप्ययं॥ वेदमित्र इति ख्यातः सखास्याभू
न्नपस्यवै॥ ११॥ काव्येव्याकरणे तर्केपांडित्यं कुरुतां सदा॥ सूर्यवर्मपिताप्रादात्तत्र धर्मेश्वरायवै॥

१२॥ ग्रामार्धं देवपूजार्थं धर्मवर्मा नृपोलभत्॥ शूलमुद्रांकितशिलांअर्धग्रामांतसीमनि॥१३॥ न्यधात्त
दा महेशेन भूरियं परिसंख्यया॥ एवं स्थिते सूर्यवर्मा वेदशर्मानुजे द्विजे॥१४॥ ददौ ग्रामार्धमेनं चाशि
वदत्तार्धभागकं॥ द्विजैरन्यैर्वेदमित्रः गृहीत्वा नृपशासनं॥ १५॥ बुभुजे सस्यजातं सः राजमित्रत्व
गर्वितः॥ शूलांकितां शिलां हित्वा किंचित्किंचिदुपाहरत्॥१६॥ शंभोर्भूमिं राजमित्रो द्विजैरन्यैश्च सं
गतः॥ विवादः सुमहान्जातः सशिवार्चकमंत्सुरे॥१७॥ शिवार्चका ऊचुः॥ ॥ महाराज द्विजा
यूयं शंभोर्भूमिरियं पुरा॥ धर्मेश्वराय दत्तेयं राज्ञा वै धर्मवर्मणा॥१८॥ शूलांकितां शिलां स्वात्वा त्याद
त्तेयं तेन भुंजता॥ मा कुरुध्वं शिवद्रोहं यूयं वेदविदांवराः॥१९॥ वेदांतवेद्यो भगवान्नंबिकापति
रीश्वरः॥ प्रमाणं यदि वो विप्राः शिवद्वारि वदंतु वा॥२०॥ भूरियं न शिवस्येति गम्य तां शंकराग्र
तः॥ इत्थं शिवार्चकवचः श्रुत्वा सक्रोधमीर्ष्यया च॥२१॥ उवाच विप्रैः सहितो वेदमित्रो शिवार्चकं॥
॥ वेदमित्र उवाच॥ ॥ यूयं मूढतमाः सर्वे शंकरः कः शिलागतः॥२२॥ उक्तेपि तत्पुरः किं समदीया
मिति वक्ष्यति॥ राज्ञः पित्रा पुरा दत्ता भूरियं धर्मसंकरे॥२३॥ तत्पुत्रोयं सूर्यवर्मा तत्पुरः परिकथ्य
तां॥ तेनास्मभ्यं ग्राममर्धं दानं चकृतवान्हो॥२४॥ शिलापेक्कथने किं वा ततो द्वारि प्रगच्छत॥ त
त्पूर्वमेव गत्वा सो राज्ञो यत्निकटे स्थितः॥ वेदमित्रो मित्रभूतः परिषन्मंडलं गतः॥ काव्यप्रहेलि
काभिश्च रंजयंतं नृपं तदा॥२६॥ एतस्मिन्नंतरे राज्ञो द्वारि धर्मेश्वरार्चकाः॥ धर्मेश्वरार्चकाः
सर्वे विवादेन द्विजैः सह॥२७॥ समागतान्नृपद्वारि द्वास्थो यूयं विशेषतः॥ तान्नमस्कृत्य ने
द्वास्थो नृपं प्राप्य प्रावेदयत्॥२८॥ प्रवेशयं नामित्यप्रशासनराजा विप्रैः सभागतः॥ धर्मेश्वरार्चकां
दृष्ट्वा प्रहसन्पार्श्वगं द्विजं॥२९॥ अपांगकोणतः पश्यन्वेदमित्रं तदा नृपः॥ उवाच तत्र धर्मेशपूजका

नर्चकोत्तमान्॥३०॥ भूप उवाच॥ ॥भवदागमने हेतुः कोत्र मद्यं वदंतु वः॥ नृपस्य वचनात्तेतं
राजानं प्राहुरर्चकाः॥३१॥ अर्चका ऊचुः॥ ॥महाराज भवत्पित्रा दत्ता धर्मेश्वराय भूः॥ भवतार्चार्थं
भूर्दत्ता वेदमित्रस्य भूपते॥ हरत्ययं भूमिमेनां हापने हायने द्विजैः॥ शिवद्रोह्ययमुन्मत्तो तवस्मा
हाय्यतो नृप॥३३॥ वेदमित्रस्ततः क्रुद्धो प्राह नत्र शिवार्चकान्॥ ॥विप्र उवाच॥ यूयं वेदवि
हीनाश्च भृत्यर्थं शिवपूजकाः॥ धर्मेश्वरार्चनमिषाद्भूयद्भिर्भूः प्रभुज्यते॥३४॥ निवेद्यं देवायान्ने
वाः वयं वेदोक्तकर्मठाः॥ अस्मिन्मंत्रेण देवानां शिलानां सन्निधिपरा॥३५॥ शिला किं भुज्यते चा
न्नं गच्छंत्वद्य यथागतं॥ ॥शिवार्चकः०॥ ॥यस्येश्वरस्य निश्वासो वेदो विप्रधनं द्विजाः॥ तमहे
शं विनिंद्यैवं कां गतिं समवाप्स्यथ॥३६॥ अस्मत्तेः परं चागः तदुत्थन्नान्नभोजिनः॥ यूयं तं नि
दयाचिप्रा नरकाने यगच्छत॥३७॥ ॥राजोवाच॥ सत्यं ब्रवीत्ययं विप्रो वेदमित्रः शिवार्चकाः॥
शिलासंस्थो महादेवः किमास्येन भरवादति॥३८॥ देवाः सर्वैर्विप्रमुखैवरदंत्यन्नं सदा मुदे॥
तेन प्रीता भवंत्येव यूयं गच्छत माचिरं॥३९॥ द्विजैर्गोभिस्तथाक्रम्य भुक्त्वा गच्छाति गां शिवः॥
विप्रेषु विश्वासपरा राजानो दिविसंस्थिताः॥४०॥ प्रत्यहं देयाविप्रा वेशिवो मंत्रैः शिलां ग
तः॥ यथाकथंचिदेवास्तु यूयं गच्छंतु चालयं॥४१॥ सच्छुत्वा निर्ययुः शंभोरगारस्थाः शिवार्चकाः॥
धिक्कारा राज्ञा नमितिते शिवद्रोह वतां वरं॥४२॥ शिवद्रुहो द्विजाः गेते नरकाने कर्विंशालिं॥ भुजंनि
प्रति कल्पं वैयावद्भूरेणु संख्यया॥४३॥ इत्युक्त्वा निर्ययुः क्रुद्धा धर्मेशद्वारि ते नर्चकाः॥ ॥शिवार्चका
ऊचुः॥ ॥अहो महादेव दयानिधान शर्वार्चनासाधन जातभूमिं॥ नृपो हरत्येष द्विजाधमार्थेकः कुरुष्व
तस्यानुपदं भयं सदा॥४४॥ शिवोपि कालेन नृपस्य तस्य भूमिं सराष्ट्रां युधि तं प्रणास्य नृपोन्य को

वंगपतिस्तदानीं तत्पार्श्वे गामं गणाः प्रदुद्रुवुः॥ सर्वेदविप्रोपि सुतैः स्वभार्यया कालात्तम तोसौ यम मापप्रभुज्ञा॥ पित्रा न पोष्य त्र दशां द्विजैस्तदा भुक्तेर्विचित्रां नरकार्णवं गतः॥५५॥ तां वेदमित्रस्य ललाटमूलाज्जिह्वां समुत्पाट्य धिवस्य निंदकां॥ संभोजयं त्यत्र च शंभुभूमेः तत्पांशुसंख्यात नक कल्पमत्र॥५६॥ द्विजास्तदा तत्र महोदरैर्मर्दनाः शिवस्य येस्य भुंजोत्र भूमेः॥ ते वायसे रायसतुंडकंकैः लुधंत एवात्र वसं निमज्जिताः॥५७॥ राजाप्ययं वायसतैलयंत्रे संपीड्यते तत्र कंदति वेदिवानिर्वा॥ शिवस्य भूमेहरणे नतेद्विजाः॥ संप्रापुरित्थं प्रति कल्पनारकाः॥५८॥ तस्माच्छिवद्रोहमिमं न वास्मरेत॥ शंभोः कदाचिन्मनसापि कर्ता॥ उक्त्वाप्यहं चापि समुद्धरं गकंपेन वक्रेण सगद्गदो द्रुवं॥ द्रोहप्रसक्तो शिवसंस्मरेण नान्योप्युपायोस्ति गणेश्वराद्य॥५९॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये उत्तरभागे शिवभूम्यपहारकथने चतुस्त्रिंशोध्यायः॥३४॥ ॥श्रीईशानाय नमः॥ ॥ ईश्वर उवाच॥ एवं शंभोर्भूमिहरकथां श्रुत्वा यमस्तदा॥ विस्मयाविष्टहृदयावास्ता यमगणेश्वरो॥१॥ ऊचु चतुश्चित्रगुप्तं लं तत्र सभ्येसहासरान्॥ ॥यमगणेश्वरो॥ केयमत्र स्थिता वेश्या वेश्यः कस्तत्र पात्यते॥ विशेषेण श्रोतुमिच्छा वदारभ्यं च तत्कथां॥२॥ केनेतो शिवद्रोहेण भुंजालेयातनाश्चिरं॥ अधोमुखो ध्वपादो तौ संलग्नाय सस्र्यं खले॥३॥ खदिरांगार मध्यस्थो वेश्यो वेश्यात्र तिष्ठतः॥ क्रंदतस्तो दिवारात्रं अविश्रांतं वदाधवे॥४॥ गणेवास्य यमस्य तच्छ्रुत्वा वाचं मचित्रकः॥ ताडवाचांजलिं कृत्वा वेश्या वेश्यकथां तदा॥५॥ ॥ चित्रगुप्त उवाच॥ ॥ शृणु तं वैश्य वेश्यायाः शिवद्रोहस्य कारणं॥ एतावास्तां पुरा गौडे चर्मण्वत्यास्तटे पुरे॥ नाम्नाकुंदपुरे तत्र कुंदेश्वर शिवालये॥ वेश्यो यमापणी तत्र प्रसार्यापणमुज्वलं॥७॥ नवधान्ययुतं तैल

गुडतुंडलविक्रयं॥ करोति सज्जनानां वै नित्यं रात्रावधिप्रिये॥ ८॥ तत्र कुंदेश्वरागारे वेश्यां गोश्
लोकनांकितां॥ नृत्यंतीं ददर्श रागारे वशीचक्रे धनादिभिः॥९॥ तां तदागारमानीय भार्यावत्तोषय
धनैः॥ वस्त्रैराभरणैः खाद्यैः मंचास्तरणाय दूकैः॥१०॥ एवं संवर्धिता वेश्या वैश्यस्यैव गृहे
स्थिता॥ नागच्छ छंकरागारे सा यं नर्तनमंटपं॥ ११॥ विचिन्वंति च तां तत्र वेश्यानां च गृहे तदा॥
तामदृष्ट्वा मासमात्रं केनचिद्वैश्यमंदिरे॥ १२॥ दृष्टेति वदताथैनि तमाजग्मुश्च वैश्यकं॥ शिवाल
यस्थाश्च नरा नटा वेश्या नटा परे॥१३॥ गत्वा नत्वा तदा वैश्यं अब्रुवं तत्र संघशः॥ ॥ शिवनराः॥
नेयं वेश्या त्वयागारे संस्थाप्या शिवनर्तकी॥ गोलांकिता विशेषेण त्याज्येयं मातृवत्त्वया॥ १४॥ शास्त्र
मस्त्यवविहितं न श्रुणुष्व विशांवर॥ अपि वां मातरं गछेन्न गछेद्देवदारिकां॥ १५॥ मुंचतां न शिव
द्रोहं कर्तुमर्हसि मानद॥ स्त्रीणां नर्तनमुत्कृष्टं शंभोरग्रे सदा शिवा॥ १६॥ तीर्थतत्कादिकरणा
छिवायानंत्यमश्नुते॥ स्त्रीदानेशंकरागारे यावत्स्त्रीरोमसंख्यया॥१७॥ कल्पानां कल्पसंख्या
नां कैलासे यसते नरः॥ नर्तक्याहरणा छंभोर्यावत्तं द्रोमसंख्यया॥१८॥ शिवद्रोही कल्पकोट्या
वसते नरकार्णवे॥ मुंच मां नर्तकीं शंभोर्वैश्यायात्व मिमां शिवे॥१९॥ इत्थं शिवालयस्थानां नराणां
वचसा वणिक्॥ प्राह संतानसमुद्वीक्ष्य त्यक्तं वेश्याधरप्रियः॥२०॥ उवाच कामी वैश्योयं वेश्यासंगमलाल
सः॥ ॥वैश्य उवाच॥ ॥मयेयं चारुसर्वांगी पीनोन्नतपयोधरा॥ वलासंगार्थमेवाद्य नैव मुंचामि वै
कचित॥२१॥ दृष्ट्वेमां मानसं मे द्य न दारे रमते नराः॥ नाहं नाम यमुं चामि प्राणेभ्योपि गरीयसीं॥
२२॥ दासीं मे यौवनोपेतां मदीयां नयनालयं॥ तस्य नर्तनशिक्षां च कारयिष्ये धनादिभिः॥ २३॥ तमू
चुस्ते नरा वैश्यं इमां गोलांकितां त्यज॥ नत्यजामीति वैश्येन राजद्वारमुपागताः॥ २४॥ राजा

नंधनदानेनतस्मिन्प्रीतिमथाकरोत्॥ सचिवास्तस्य वैराज्ञः सर्वेवैश्योधनदानतः॥२५॥ तेसर्वे
वश्यवैश्यतं वेश्यमालयिनोनरान्॥ दृष्ट्वोचुर्नृपतेरग्रे वैश्योनः पुरभूषणं॥२६॥ प्रदेयास्यै
वसावैश्याशिवागारेच चेटिकां॥ प्रेरयेद्वैश्यवर्णोयं तथैवाहन्त्यपो ह्यसौ॥ यथाकथंचिद्देवाग्रेन्न
नचिध्रोनवैभवेत्॥ गच्छध्वं शंकरागारे गृहीत्वा वेश्यचेटिकां॥२८॥ वैश्यपारमतां वेश्यामहा
राज्ञः प्रियाह्यसौ॥ इत्युक्तमात्रतः सर्वे सचिवैस्तैर्दुरासदैः॥२९॥ ऊचुः शिवद्रुहामग्रे स्थातुमे
वचनक्षमं॥ वेश्यचेटी परित्यज्य जग्मुः सर्वेशिवालयं॥३०॥ कुंदेश्वराग्रतः सर्वेदुःखितामे
नमाश्रिताः॥ ततः कालेन राजापि वैश्या वैश्यश्च मंत्रिणः॥३१॥ ग्रामनाम्ना ग्रामाजग्मुर्भटदं
डेश्वरखंडिताः॥ बाहुबक्षकशाभिस्ते पातितानरकह्रदे॥३२॥ वैश्ये पममपिसोन्मत्ता पुरावैश्ये
नसंगता संनष्टश्रीससुभगांकेंदनेहर्निशं यम॥३३॥ राजाप्ययं शिवद्रोही अविचारेण पापकृत्॥
धनाशायोर्ध्वपादोयं त्वं वनेश्वरखलापदः॥३४॥ संतप्तखदिरांगारमध्यस्थो मंत्रिभिः सदा॥ कशासंता
डितोनित्यं सर्वांगाईव्रणोनिशं॥३५॥ क्षारैः संसेच्यते वैश्यो वेश्यया क्रंदते सदा॥ हाहा मन्मथचे
ष्टया भुवि मयार्थं भोश्च वैश्यांगना संभोगे च दनस्य चुंबनवशात् धिक् दुर्दशामीदृशी॥ प्राप्तोस्म्यघ
परत्र दुष्कृतभयं निस्तारविस्तारितं कोवासह्यतमं महाग्नि नरकं संह्येन कोमादृशाः॥३६॥ ॥
इति श्रीशिवरहस्ये दशमांशे उत्तरभागे शिववेश्याहरणकथनं नाम पंचत्रिंशोध्यायः॥ ॥श्रीई
शानायनमः॥ ॥श्रीईश्वर उवाच॥ ॥ कश्चिद्ग्रामहरश्शंभोः तद्द्रोहोत्र महानभूत्॥ तांकथां
कथ्यमानां मे शृणु नारकिणोत्र वै॥१॥ गोदावर्यास्तटे कश्चित्त्र्यंबकेश्वरगास्तदा॥ सहस्रसंख्यगो
पस्तु संवत्सं भुवि चारयत्॥ शाखावत्तेथ गोदायाः तटे पावनतुत्तमे॥ पिबंति गोदानीरं तादुर्हं नपय

उत्तमं॥३॥ तद्गोपयोहि यच्चंतो त्र्यंबके शंशिवार्चकाः॥ तत्राधिकारिणो गावः तद्गोभिः संगता
श्चरन्॥४॥ शतसंख्याः सवत्सास्तास्तनटेऽपि सुवासके॥ त्र्यंबकेश गवां मध्ये दशवर्षं तदायम॥
५॥ गोपैः संकलिता काश्चिद्गावः सायं गृहं ययुः॥ चोरोपनीता देवस्य गावः श्रलांकिताः तदा
॥६॥ ग्रासजेयतदा गावः वत्सैर्वत्सतरीयुताः॥ पुनः कतिपये काले अधिकारी गवां दृशा॥७॥ श्रलांकनोज्झि
ता गावः गृहीताः नाह्हि चोरकैः॥ तदागत्य समं गोभिः गोपाधिकृतिकारिणे॥८॥ अब्रुवन्नपीत हृद
याः गोपाः प्रांजलस्तदा॥ ॥ [illegible] गोपा ऊचुः॥ ॥ शिवगोभिरसवत्साभिस्त्वद्गावो यत्तकेषु नाः॥ पूर्वं
चोरोपनीता वै दृष्ट्वा श्रलांकनं विभो॥९॥ श्रलांकनं नेदृष्ट्वै व प्रातर्गावो विमोचिताः॥ तव गावो दस्त्रा
दृषेव नैनेर्नीता ह्हि चोरकैः॥१०॥ तेभ्यो यथोचितं शिक्षां कुरुत्व मविचारतः॥ स तदा श्रुतवृत्तांतः गो
पेभ्यो गोहृतां तदा॥११॥ चोराणां शासनं कृत्वा अहारास्पदगोर्मम॥ तावन्मदीयसदने शिवगावो दु
हं तु वै॥१२॥ दशसंख्यावधि व यावत्तं लांगलधारिणा॥ कृषिं कुर्वं तु मद्गृहेः वृषेभ्यो नः प्रयोजनं॥१३॥
तदाधीकारिवचनाद्गोपा ऊचुः परस्परं॥ गोपा ऊचुः॥ ॥ अधिकारी वदत्येवं शिवद्रोहोऽत्र नो भवेत्॥ उ
पेक्षायां महान्दोषो भविष्यति च नो महान्॥१४॥ शिवाभिषेकविघ्नश्च भविष्यत्यस्य दोहनात्॥
गावो दुहं त्वस्य गृहे शंभोर्वै दशसंख्यया॥१५॥ अधिकारीभवेत्क्रुद्धो नात्रदोहो गवां गृहे॥ गावो वि
वर्धमाना वै शंभोर्दोहाभिषेचने॥१६॥ अन्यासामस्य च गवां शंभोर्गोभिः समं दुहे॥ गावो नाशं भया

स्यंति अधिकारिशापो यतु॥१७॥ तस्मान्न दोहं कुर्वंतु मास्य गोभिः शिवद्रुहः॥ शिवगोपयसां वृद्धिं कांक्षमा
णो विनश्यति॥१८॥ किं कुर्मोऽत्र बलात्कारे [illegible] रधिकारे मुहुर्मुहुः॥ इत्युक्त्वा गा दुहन्गोपाः शंभोर्नित्या
भिषेचनाः॥१९॥ अधिकारिभयाद्गोपाः वर्षाहल्पपुजो भवन्॥ शिवगोपयसा तुच्छः पुरश्वासीत्तदापि

वन॥२०॥ अधिकारी शिवद्रोही तेन पापेन वै मृतः॥ कालेन मर्त्यभुवने यातनां भुंजते सदा॥२१॥ पूयधारा
सुसंतप्ताः पिबंत्यत्यंतदुःखिनः॥ गोपा निर्बंधतोप्यत्र गा दुहन्नीश्वरस्य च॥२२॥ तद्धस्तछेदने चक्रुः
करवालेन ते गणाः॥ यावद्गोरोमसंख्याकं शिवगोहार्यतिष्ठितः॥२३॥ संतप्तकंठके शोले निर्यत्सर्वांगपू
यकाः॥ गोपानां नखसंधीषु सत्यः श्रोता भवच्छिवे॥२४॥ ॥ ईश्वर उवाच॥ ॥ एवं शिवद्रोहवतां वरि
ष्ठा गावो दुहन्नीश पयोपि वंश्व॥ रथान्नियोज्य स्वकलांगलोत्थपांसुप्रसंख्यान्नरकान्प्रयाति॥२५॥
इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवद्रोहस्य कथनं नाम षड्त्रिंशोध्यायः॥३६॥
ईशानाय नमः॥ ॥ चित्रगुप्त उवाच॥ कश्चित्कृषीवलश्चोरः शिवधान्यं छलदद्दन॥ नरकान्धा
न्यसंख्यातो भुनक्त्यत्रैव पश्यतं॥१॥ शंभोर्क्षेत्रे हि घोरेण धान्यह्रच्छिवमंदिरात॥ अयोमयं धान्यरा
शिं नप्तांगारप्रभामयं॥२॥ स्वादन्नस्त्याप्नुतं[illegible]तिष्ठते द्यापि चात्र वै॥ कश्चिद्धांडीरदेशे वै राजा पू
जार्थमीशितुः॥३॥ दशसाहस्रधान्यं वै तत्रादान्नुलनामतः॥ भांडेश्वरायनैवेद्यकल्पनार्थं नृपो
त्तमः॥४॥ तस्मिन्कृषीवलश्चोरो धान्यं गोपोपि नामतः॥ लेख्यमानं ततो राज्ञे ददौ सगणकेषु च॥५॥
राजा शिवार्थे यद्दत्तं धान्यमन्यायतोपि तत॥ स्तम्भद्रोहेण पापात्मा नुष संमेलितं तदा॥६॥ मापयत्स
शिवागारे सर्वधान्य मंचूचुरत॥ दत्तं शंभोर्मया धान्यं राजाज्ञातः शिवार्चकाः॥७॥ शिवागारं न यत्न
घमयि देशे न विधते॥ न चेत्स्वलक्षितं धान्यं चोरं मूषिकतो हृतं॥ ८॥ भविष्यत्येव सहसा नदास्य हृ
तद्ण्वपि॥ इत्युक्तास्ते शिवागारं दशसाहस्रसंख्यकं॥९॥ नेतुमुद्युक्तमनसः स्वलेन त्रैव तेर्चकाः॥ भां
डेश्वरागारमध्ये धानागारं शिवायते॥१०॥ चक्रुर्मासेन तत्काले समुद्दीप्तं तणवं धितं॥ धान्यराशिं तदा
चक्रुः स्वलेन त्रैव चार्चकाः॥११॥ ॥ अर्थकाऊचुः॥ यद्ध्येन हि धान्यानां अगारं शंकरालये॥ तावंत्वं

ग्रामपालोसिसंरक्ष्यं धान्यमीशितुः ॥१२॥ तथेति सप्रतिज्ञाय ग्रामपालः शिवार्चकान्॥ समुद्रां धान्यराशिं
तां दृष्ट्वा तां पालयन्निशि ॥१३॥ दंडहस्तैर्भटैस्तस्य तत्थान्यं शाकरार्पितं ॥ एतस्मिन्नंतरे रात्रौ धान्यपाला
न्कृषीवलः ॥१५॥ भेदयामास चतुरैर्वा वैस्तद्धान्यहारणे ॥ कृषीवल उवाच ॥ ॥उपायेनात्र धान्यं वै रा
शादत्तं शिवाय वै ॥ मासमात्रं रक्षस्थायी भविष्यत्यत्र संरक्ष्यया ॥ मया पूर्वं समेतास्तु धान्यपादांशाजो
मिथः ॥१६॥ सभा हरिष्याम वयं शुकमूषिकभक्षितं ॥ कृषीवलस्य वचसा सर्वे ते ग्रामपालकाः ॥१७॥ मु
द्रां तणांकितां छित्वा किंचित्किंचिदचूचुरन् ॥ एवं मासनिशि तदाह्रि सहस्रकलाविधिः ॥१८॥ शंभुधा
न्यभरणं हन्तेभा तन्मुद्रां दधुस्तत्पेः ॥ सज्ज्ञाने तु समुधुक्ता गोणीभारे ईखे र्मितिं ॥१९॥ चकुर्धान्यमितिं
तत्र तत्रोनाममभिवीक्ष्य ते ॥ ग्रामपालां चुक्रुधुस्ते कधान्यं मानहीनकं ॥२०॥ ददं तु शंभो र्नोचेद्दूराज्ञे ब्रू
मो वयं तदा ॥ तथेत्येचाब्रुवं न्सर्वे नवो धान्यस्य चोरकाः ॥२१॥ धान्यमुद्रां प्रपश्यं तु यथापूर्वमवस्थि
तां ॥ राजापि प्रभुतश्चत्तां तो दंडयामास तां तदा ॥२२॥ कृषीवलकृतं तत्र दृष्ट्वा धान्यस्य चौर्यकं ॥ तद्धनं
दत्तवान्राज्ञे राजाप्याह शिवार्चकान् ॥२३॥ यथागतं प्रगृह्णं तु अवशिष्टं शिवस्य वै ॥ दुःखेन तेय
युस्तत्र भांडीरे शार्चकास्तदा ॥ ॥ ईश्वर उवाच ॥ ॥ राजाप्ययं चात्र कृषीवलोयं ते ग्रामपालाशि
वधान्यहारिणः ॥ कल्पायुतं रौरवमध्यसंस्था भुंजंति धान्यं त्वयसः सुतप्तं ॥२५॥ ॥ इति श्रीशि
वरहस्ये ईशानाख्ये दशमांशे उत्तरार्धे शिवरहस्यकथनं सप्तत्रिंशोध्यायः ॥३७॥ ॥ श्रीईशानाय नमः ॥
चित्रगुप्त उ० ॥ पुनरन्यां कथां वक्ष्ये शिवस्वर्गोपहारिणां ॥ संतप्तायससं दंष्ट्रौ सर्वाङ्गोत्कृत्तमांसकाः ॥१॥
निर्यद्रक्तवसामेदा भक्ष्यमाणाः खगैरवंडजैः ॥ हाहेति कंदमानास्ते अविश्रांतं दिवानिशं ॥२॥ सौराष्ट्रे सो
मनाथस्य वै रमाभरणकोशपः ॥ अभवत्कुलिजिन्नाम्ना शिवाकल्पकरक्षकः ॥ ३॥ शंभोर्वैर्गोलकं पुं

ड्रत्नाभरणमुज्वलं॥ देव्यानाटंकपार्श्वंभिभूषणानि महंति वै॥४॥ शिवागारे कोशबंधवेत्र्मार्गल
पुनेसदा॥ कोशपः कुलिजस्तत्र नित्यं दापयति स्वयं॥५॥ वसनानि महार्हाणि सोमकार्पासजान्यपि॥ पू
जाकालेषु दत्वायं शिवार्चककरा सदा॥६॥ ग्रहणे सोमसूर्योत्थे प्रदोषे सोमवासरे॥ अष्टमीषु चतुर्द्दश्यां
राकाकुहूमुखेषु च॥ गोलकं नवरत्नाढ्यं सनागाभरणान्वितं॥ त्रिपुंड्रहीरतिलकं देव्याभरणमुत्तमं॥८॥
दशानि भग्नानि गलानि कोशे संस्थापयत्यपि॥ शिवकोशाधिकारोयं जीर्णं वै स्वर्णकारकः॥९॥ सकारय
ति शोभार्थं धनेन नियमात्सदा॥ वस्त्राणि च मनोज्ञानि पेटिकायां दधात्ययं॥१०॥ तस्यैकागणिका वेश्या
सोमेशागारनर्तकी॥ तत्संग नित्यमुदितः कुलिजित् शिवकोशपः॥११॥ ॥वारांगना०॥ ॥कुलिजित्वं
प्रसन्नश्चेन्नवसंगफलं मम॥ तप्तचामीकरमयीं देव्याः कंठसरावलिं॥१२॥ शिवत्रिपुंड्रहीरं मे देहीना
सासमुज्वलं॥ करोम्याभरणं विप्रमुक्ताभरणसंगतं॥१३॥ रक्तपट्टं महादेव्या वसनं मम धारणे॥ तद्धृत्वा
नृत्यनीस्वैरं सोमेशाग्रमनोहरा॥१४॥ युवयिनप्रमथिनी रंस्ये हं त्वया सह॥ पण्यांगनां तदा प्राह कुलि
जित्कामुकस्तदा॥१५॥ ॥कुलिजिदुवाच॥ ॥कथं करोमि देवस्य ददाम्याभरणं त्वयि॥ जना जानंति
सर्वेपि राजदत्तं त्रिपुंड्रकं॥१६॥ अमूल्यहीरं फालाक्षफालशोभावहं सदा॥ देव्याः कंठसरं तप्तचामी
करमयं नवं॥१७॥ वणिक्दत्तं कथं वेश्ये दास्याम्यहमिदं नव॥ विश्वासेन मयि न्यस्तं राज्ञा चात्र शिवार्च
के॥१८॥ कथं दास्यामि सुभगे तदुपायो विचिंत्यतां॥ कुलिजिद्वचनं श्रुत्वा स्त्री साहसवशादियं॥१९॥
प्राह तं मदमत्ताक्षी तदा कुलिजितं पम॥ ॥वेश्या०॥ ॥नवसंगेफलं किं मे उपायं ते वदाम्यहं॥ स्वर्ण
कारः शिवागारे स्थितो यं त्वद्वशंवदः॥२०॥ तेनोत्पाद्य त्रिपुंड्रस्थं हीरं रत्नचितमीशितुः॥ शुद्धस्फटिकखं
डं च पुंड्रे स्थापय माचिरं॥२१॥ तद्रहस्येण माहं द्दीतत्कुर्वे मम नासके॥ अनेन स्वर्णकारेण नायोस्मात्त

त्यमुच्यते॥२२॥ संभुक्ष्य पेतलमयीं देव्याः कंठसरावलिं॥ कृत्वानेन प्रदेहि त्वं देव्या मम सुकांचनीं॥
२३॥ वस्त्रं पट्टमयं देव्याः वणिक्‌ दत्तमिति स्फुटं॥ वदाम्यहं जने चैवं एवं मन्नीतये कुरु॥२४॥ समा
समात्रं निर्बंधाद्वेश्यायाः स्वर्णकारतः॥ उत्पाद्य च त्रिपुंड्र स्फट स्फाटिकं स्थाप्य नत्रवै॥२५॥ हीरं द
दौ स वेश्यायै पैतलीं कंठगावलिं॥ धनं र हसि किंचिद्दत्वा यं स्वर्णकारिणे॥२६॥ नमाहूय स सं के
तं कुलिजि द्वेश्यया हृतः॥ कामासक्तो ददौ शंभोः हीरं देव्याश्च कंठगं॥२७॥ निवृत्य कंठभरणं वेश्या
यै शिवभूषणं॥ तेन पापेन नष्टायुः शिवद्रोहेन पातकी॥२८॥ स स्वर्णकारिणो हस्ते व्रणो भूत्तेन वै म
तः॥ भगंधरेण वेश्यापि मृता त्वत्पुरमागता॥२९॥ कुलिजित्पुत्र दारेण सहितो मृति माप्तवान्॥
बद्धो यमभटैर्नीता लवपूर्वं यमांतिके॥३०॥ यमोपि दृष्ट्वा शंभोर्वै द्रोहिणां च वरं तदा॥ स्वर्णकारं च
वेश्यां च मामुवाच न दायमः॥३१॥ ॥यम उवाच॥ किमनेन कृतं कर्म वेश्यया चात्र मां वद॥ स्वर्णकारे
ण चाप्यत्र च दत्वं चित्रगुप्तकं॥३२॥ तदां तकवचः श्रुत्वा तमवोचमहं तदा॥ सौराष्ट्रे सोमनाथेशाको
शपः कुलिजिद्द्विजः॥३३॥ तत्संगतात्समावेश्यास्वर्णकारोस्य मित्रकः॥ उभावपि शिवद्रोहं कुर्वा
ते स्वर्णहारिणौ॥३४॥ रत्नापहारिणावेतौ वेश्यार्थं काममोहितौ॥ तदा तत्सर्ववृत्तांतं कोशपस्वर्णकार
योः॥३५॥ वेश्यायाश्च तदा प्रोक्तं मया लब्धयमाज्ञया॥ यमाज्ञयैतौ वेश्या चाप्यत्राकल्पमवस्थिताः॥
संतप्तक्रकचाकारविदारितशरीरकाः॥ निर्यद्रक्तवसापारवसायसतुंडकैः॥३७॥ तुद्यमाना दिवा
रात्रं कं रंति स्वर्णहारिणः॥ ॥ ईश्वरः॥ शंभोः सुवर्णहरणानवरत्नहाराः संदीप्तवह्निःपरिवीते
न सर्वगात्राः॥ आकल्पमेव नरकान्परिभुंजते ते प्रोक्ताः शिवद्रुहवतां प्रवरा वराकाः॥३८॥ ॥ इति श्री
शिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे अष्टत्रिंशोध्यायः॥ ॥ श्रीईशानाय नमः॥ चित्रगुप्त उवाच॥

शंभोर्द्रोहपरान्येपि केचिद्रात्रिचरा निधिः ॥ भद्रेश्वरशिवागारे नर्मदातीरगे पुरा ॥१॥ शिवालय
स्य प्राकारं रज्जुनाबध्य तेपतन् ॥ उद्दीप्य दीपिकां रात्रौ भर्गेश्वरशिवालये ॥२॥ अर्धरात्रिभवां पूजां
कृत्वा जग्मुः शिवार्चकाः ॥ शिवद्वारि स्थितं श्रुद्रं हत्वा तत्र निशाचराः ॥३॥ तत्कवाटार्गलो द्घाटं गृहीत्वा
शिवधामनी ॥ उद्दीप्य दीपिकास्तत्र आहरन् तत्र भूषणं ॥४॥ वस्त्राणि क्षौमजातानि ताम्रभाण्डान्य
पि ध्रुवं ॥ शिवनैवेद्यरूपो द्धोध्य दीपान् निशि शिवालये ॥५॥ कांश्यपैत्तलपात्राणि धूपदीपार्तिकान्य
पि ॥ पिठराणि च स्थाल्यश्च आर्तिक्यान्यपि च ध्रुवं ॥६॥ निन्युरन्योन्यसंसक्ता पापिष्ठास्ते शिवद्रुहः ॥
ते गच्छंतो त्रयिपिने गृहीत्वा शांकरं धनं ॥७॥ वने ग्निना दह्यमानाः चोरास्तत्र वने मृताः ॥ ते नीता
निरये घोरे द्रोहेण स्वेन निशाचराः ॥८॥ सतप्तांगारशयना भुंजंते नैव यातनाः ॥ केचित्तपाश्वम
तुजा विवाहे वरयोस्तदा ॥९॥ चामराणि च छत्राणि दधुः सांगे शिवद्रुहः ॥ वस्त्राण्यपहरन् शंभोः
वाद्यान्यप्यपवादयन् ॥१०॥ शिवस्य नर्तकी नित्यं यमस्य निशि ते गृहे ॥ गंधान्यपाहरन् केचित्तु
गंधीनि सुमान्यपि ॥११॥ वाहनान्यपि यानानि शिवभोग्यानि यानि च ॥ आहरन्यापिनः केचिद्धा
तनानारकोत्तराः ॥१२॥ भुंजंति ताः श्वश्वपच्च वाद्या मतो यमगणेश्वरो ॥ ॥ चित्रगुप्त उ० ॥ ॥ संतप्ताय
सस्तंरवलोकितनपदाल बंत्यधोमस्तकाउच्चैर्त्रोशंति विलवके शनिचया स्ते संचितैः कर्मभिः ॥ पापंश्रा
वं विनिंदनं श्रुतिपुटैः श्रोतारये आसंते तेसीसत्रपुलप्तकश्रुतिगगोर्भस्मोऽपि पालिंगकाः ॥१३॥ सं
प्राप्य समुद्रयाशिवमहालिंगाद्यलोकाश्चये ॥ तन्नेत्रेषु च तच्चिकाश्वनिभनं तं संपूरयंते गणाः ॥
भावानां भगतेत्रपूज्यरहिताः तेषां करांछिदते ॥ शंभोस्तत्स्व वपात्रपोऽङ्गिसतपदो तो वदलेमस्त
केस्तेषां तेलसुधौतको शारहितैः छिदंति रवड्गे गणाः ॥१५॥ ये ते यमहो महेशभुजि तं रवादंति

श्रीशिवर॰१०

३६

ई॰ द॰ उ॰

नोवापयः॥ पीतं येर्नरकार्णवे मलजलं स्वादंति ते पांति च॥ तेषां मस्तकनमस्तु महादंडैश्च तेखं
डिना॥ मुंडैः षंडविदंड कांधारजैः विव्याधिनावर्षति॥१६॥ येनैव भस्तुंढंति शंकर महागारे
नति भस्तुतिं नो कुर्वंति नवीक्ष्यं ते न पतन यो लिंगं सदा शंकरं॥ ये छिंदंति शिवालयं तं नरमहा
कूपं च तीर्थं विभोः संपूर्यंति च नद्रुमं स्वभवने छिंदंति पुष्पाण्यपि॥ गंधानप्यथ लाप्यचस्वकत
तोसंदग्धसर्वांगकाः॥ ते निष्यंति हि दिवानिशं महददनां अत्र ध्वनिः श्रूयते॥१८॥ ते कुंभिपाकमसि
पत्रवने पतंति संघातृच भसिंधिलांगकृरांध्रपस्युः॥ यस्य ध्यानवीहीनमानसनराः संतप्तलाक्षा
रसैः सिंच्यंते नरकार्णवे भटगणैः पार्श्वैस्ते रुदंत्यन्वहं॥ संतप्तैः तैः सुमहाज्वलवह्निजालधूमांकि
तांग सुशिराः स्वकवर्षपाकैः॥ पक्काः पुनः पुनरयो घनभारवाहा शिश्नेन्द्रिये च महदग्निकणांन्च
हेतः॥ संतप्तवालुक सुभर्जि न भ्राष्ट्र मध्य संस्थाः ते नो य शिवलिंग समर्चयंतः॥२१॥ एकाह
मप्यत्र वसंति मूढाः शंभोस्तथा देवविहीनमानसाः॥ फलान्यथादंति शिवार्चितोक्षिताः पानी
यमप्यत्र पिबंति ये नराः॥२२॥ ते रेतसः पानमिदं सुघोरोपि वीभिरेतः परिपूर्णकंठः॥ श्रीनीलकं
ठेन सहान्यदेवं संपूज्य संपाति नरोऽसिपत्रं॥२३॥ यस्त्वूर्ध्वपुंड्रं त्वलिके दधानो जपेच्च पंचाक्षररुद्रमी
शं॥ समर्चयद्धा नियतं विभूतिरुद्राक्षहीनो लभते ऽन्धकूपं॥२४॥ शाक्तोपि न कार्चनवर्जितो भवेत्प्रदो
षभूतास्वपवाष्टमीषु॥ सोमव्रते चात्रदिवा भुजिक्रियां कुर्वंति ते चात्र हि कीटराशिं॥२५॥ भुंजिनि ये
चात्र शिवद्रुहः सदा ये वा शिवागारनिरीक्षणोज्झिताः॥ तद्भुत्सवालोकनवर्जिता ये ये त्वां भुयात्रास्व
पि विघ्नकारिणो निघ्नंति दंडैर्गदया च रौडिताः॥ २६॥ निर्यन्महारक्तवसांत्रमेदसमुक्षितांगा
त्रवसंति कल्पं नच्युताभूमितलं प्रपन्ना पापा जना रासभसूकराः श्वुनः॥२७॥ भवंति ते कंटकि

श्रीशिव

१ते

रसंघासर्यो शुनश्नाहरिणेषु संस्थाः॥ कंककाकबकधूकवक्त्रकैरापसोगृध्रुनकैर्विदारिताः॥
॥२७॥ निर्यदांत्रगुदकांडजकंटाः यांनिते नरकजालविचित्रं॥ उत्कोशको शासिलनावगाढकंठो
कानिर्भररक्तमांसाः॥२८॥ पतंति मुंडकबंधभगतानत्यक्त बंधामवगाढमास्थिलाः॥ भूः स्वर्णस
द्वस्त्र समांसभिनाः शिवस्य ये भूमिगताहरंति॥२९॥ तर्पणंति ये नामम हेश्वरस्य विष्णोश्च सार्त्य प्रवं
मिवाचा॥ ते यांललाटाद्गुसनं भगरहानिःसारयंस्वत्र गणाः त्वदीयाः॥ शिवद्रुहो यत्र सुदुःसहाः
सदायायालना स्तानहि वकुंभसमाः॥ द्रष्टुं नवैत्राक्यानहि दर्शनाय योग्याः कथं पापजदर्शनेन॥
३१॥ संस्पर्शनेनापि शिवद्रुहां सदानतादृशां पापगणं भवेद्युम॥ निरस्ताभिधास्तास्वहस्तोरुदं
डैः पुरस्तादधस्ताच्यवंते दिशास्ताः॥३२॥ स्वलित्यासुनिर्यं नरिषे नेयिष्यं महानेषु वागरिष्या
॥विदग्धानिरुद्धाभटैस्तैर्विरूधा शिवाचारहीनादिनास्तेसुबद्धाः॥३३॥ कृशापाशसंदंशतः कृ
त्तगात्राः शिवद्रोहि संसर्गिणां वांगभंगाः॥ सौरिसैनिकरहोगणवक्षापातिनाश्च पतिता नरबस्ताः
॥३४॥ भीतिलोलनयनाहि रूपाणैः कंठवर्त्मनि हितैश्च विशस्ताः॥ मुस्तादिनः स्वमरणेरवतो
त्रयाद्दकनाद्दकधाताधिकरवाहि शिवद्रुहस्ते॥३५॥ ऊर्ध्वलंबितपदैरथवक्त्रास्तागतोत्कूननवाजि
नैरक्तः॥ ब्रह्मघ्नगोघ्नाश्चसुरासवादागुरोस्तु भार्याहरणाः सुवर्णहाः॥३६॥ नतत्संगिपापादपिघो
रमेतत्स्वकार्यमेतत्सहसा शिवद्रुहः॥ तस्मान्नरैर्भक्तियुतैर्नकार्यं शिवद्रुहं वै मनसां नकाय
नः॥ ३७॥ नचेंद्रियैर्वापि कदाचिदित्यं मयोक्तमेषां चरितं पुरातनं॥ नकल्पकोट्यापि न निस्तरो
भवेहि स्तारमेषां कथितो मर्यादां॥३८॥ ॥ इति श्री शिवरहस्ये दशमांशे उत्तरभागे शिव
गौरी संवादे शिवद्रोहकथने एकोनचत्वारिंशोध्यायः॥३९॥ ॥ ईश्वरायनमः॥ ॥चित्रगुप्त

उवाच॥ ॥ समांसमीनामांसादात् यम विप्रहणाद्धात॥ घोरोयं वैशिवद्रोहो नकार्यः सर्वथा
नरैः॥१॥ स्वर्णस्तेयात्सुरापानात्स्त्रीबालवधतोपि च॥ घोरोयं वैशिवद्रोहो नकार्यः सर्वथा नरैः॥
॥२॥ मातगम्याद घाद्येव स्नुषाकंन्या समागमात्॥ घोरोयं वै॰॥३॥ तत्संगिसंगपापाच्च नवधान्य
हराद घात॥ घोरोयं वै॰॥४॥ रत्नापहरणात्पापात् न्यासापहरणादपि॥ घोरोयं वै॰॥५॥ विश्वस्ता
श्वस्त घानाच्च बालवत्सगवां द्रुहात्॥ घोरोयं वै॰॥६॥ असत्यवचनात्पापात्कूटसाक्ष्याद्विवागमा
त॥ घोरोयं वैशिवद्रोहो नकार्यः सर्वथा नरैः॥७॥ गजाश्वगोवधात्पापाद नडुद्धधपातकात॥ घो
रोयं वै॰॥८॥ विप्रवृत्त्युपघाताच्च मर्वांवृत्त्युपरोधतः॥ घोरोयं वै॰॥९॥ अग्निदाहरदाच्चापिनिं
दकाच्चापि वैयम॥ घोरोयं वै॰॥१०॥ दुःश्राद्धभोजनाच्चापि शूद्रवैश्यवधादपि॥ घोरोयं वै॰॥११॥
सस्यनाशाकराच्चापि नटाकारामभेदकात॥ घोरो॰॥१२॥ वृथावृक्षछेदनाच्च राजगाम्युघतो
पि च॥ घोरोयं वै॰॥१३॥ संकरोत्यजनाशाच्च स्त्रियादिविनाशनात॥ घोरोयं वै॰॥१४॥ वृथा
भिशापजात्पापादयाज्यानां यथाजनात॥ घोरोयं वै॰॥१५॥ अपेयपानाच्च यम अभक्ष्याणां च
भक्षणात्॥ घोरोयं वै॰॥१६॥ राजस्त्रीगमनाच्चापि राजश्चैव वधात्तथा॥ घोरोयं वै॰॥१७॥ व
र्णाश्रमाणां धर्माणां परित्यागोद्भवाद घात॥ घोरोयं वै॰॥१८॥ असाध्यभोज्यनाच्चापि पंचयज्ञो
पघाततः॥ घोरोयं वै॰॥१९॥ पितृमातृपरित्यागात भ्रातृतन्धनहारणात॥ घोरोयं वै॰॥२०॥
पण्यांगनासु संभोगात्सोमविक्रियजाद घात॥ घोरोयं वै॰॥२१॥ सदावार्धुषिकत्वाच्च तिलतंडुलवि
क्रयात॥ घोरोयं वै॰॥२२॥ त्रपुसीसगुडादीनां कंबलाजिनवाससां॥ घोरोयं वै॰॥२३॥ ब्रह्मस्वहर
णाच्चापि बालस्त्रीधनहारणात्॥ घोरोयं वै॰॥२४॥ कन्याकानां क्रयाच्चापि भृतकाध्यापनादपि॥

घोरोयंवै०॥२५॥ अपालितप्रजस्यैवराज्ञश्चैवतुपातकात्॥ घोरोयंवै०॥२६॥ अन्यास्त्याभिकरणा
त्पाकभेदाद्वयप्रदात्॥ घोरोयंवै०॥२७॥ तिलहोमाद्रुद्रजपादन्यार्थे धनमानतः॥ घोरोयं०॥२८॥
रसानांविक्रयाच्चैवरणेभीत्यापलायनात्॥ घोरोयंवै०॥२९॥ यतिनिंदाल्करात्घोरात्मर्मोद्घाटन
कादघात्॥ घोरोयंवै०॥ ३०॥ महामार्गोपरोधाच्च तु दानविघ्नकरात्तथा॥ घोरोयंवै०॥ ३१॥ पर्वण्य
न्यान्नभोज्याच्च शूद्रान्नादाल्कदंत्लशात्॥ ॥ घोरोयं०॥ ३२॥ फलपुष्पापहरणाल्स्लशय्याप्र
तिग्रहात्॥ घोरोयं०॥ ३३॥ आद्यंगोब्रह्महाचापिभ्रूणघ्नात्यांधहारणात्॥ घोरोयं०॥ ३४॥ धातुहारात्पा
त्रहारात्तथावासोहरादपि॥ घोरोयंवै०॥ ३५॥ कन्यासंदूषणाच्चापि अद्वैष्यस्त्रीविनिंदनात्॥ घोरोयं
वै०॥ ३६॥ अग्नित्यागात्सुतत्यागात्भर्यात्यागाच्चमत्सरात्॥ घोरो०॥ ३७॥ अपूज्यपूजनाच्चापि
पूज्यानांचाप्यपूजनात्॥ घोरोयंवैशिवद्रोहोनकार्यः सर्वथानरैः॥ ३८॥ स्त्रीधर्मिण्यभिगम्या
च पुंसायेमैथुनादघात्॥ घोरोयंवै०॥ ३९॥ क्रयार्थेवेधकरणाच्छिल्पजीवाच्चकर्षणात्॥ घोरोयं
वै०॥४०॥ आमध्यान्हंहलादीनांरवसंधारणाघम॥ घोरोयंवै०॥ ४१॥ शूद्रमंत्रप्रदानाच्चविघापु
स्तकहारणात्॥ घोरोयंवै०॥४२॥ गुरुद्रोहादुपाध्यायनिंदनात्महतांयम॥ घोरोयंवै०॥ ४३॥ भू
हराद्राष्ट्रनाशाच्चपुरग्रामविनाशनात्॥ घोरोयंवै०॥४४॥ विधवाभिगमाच्चापिवियोनौमैथुना
दपि॥ घोरोयंवै०॥ ४५॥ मित्राभिशंकनात्पापात्सर्वेषांरुधनादघात्॥ घोरोयंवै०॥४६॥ भक्त्या
नांभक्तिनाशाच्चरथाक्रूरारभक्षणात्॥ घोरोयं०॥ ४७॥ घृततैलापहाराच्चदधिक्षीरमधोर्हरात्
घोरोयं०॥४८॥ शुष्कार्द्रपातकानांचकरणात्तानतोयम॥ घोरोयंवैशिवद्रोहोनकार्यःसर्व
थानरैः॥ ४९॥ ॥ चित्रगुप्त उवाच॥ ॥ सर्वोघादपिदुस्तरोत्रयिहितो घोरः शिवद्रोहतोयत्पा

पं न च शंतां निमेतिसहसा कल्पे ध्वनलेप द्यपि॥ तस्माद्द्रोहमिमं त्वकार्यमधुना शंभोः कदाचित्त्व
भिः कृत्वा निरंतरं णं कदापि न भवेत्तत्त्वं विसत्यं यम॥५०॥ इति श्रीशिवरहस्ये दशमांशोत्तरभा

गे चत्वारिंशोऽध्यायः॥ ॥ ईश्वरायनमः॥ ॥यम उवाच॥ ॥ सुनंद गणपश्रेष्ठ चित्रगुप्तोदितां कथां
॥श्रुत्वा त्वया मया चापि शंभोर्वै द्रोहिणां तथा॥ १॥ विचित्रमिदमाख्यानं त्वया ज्ञातं विशेषतः॥ लो
कोपकृतये चात्र त्वया प्रश्नः कृतोऽत्र वै॥ दृष्टः शिवद्रुहा पापा यातना नानरकोव्ययं॥ २॥ नाशितोऽ हं यस्मा
त्तु भाव पादांग संगतः॥ ३॥ दुःखाधिकार पापौघ संगभंगः कृतो मम॥ नाज्ञातं च त्वया किंचिद्विद्यते
भुवनत्रये॥ ४॥ भवपादाब्ज संसक्त मानस त्वं गणेश्वर॥ मल्लोकवासिनः पापापावनाभवदागमा
त्॥ ५॥ शांभवानां पादपद्म रजसा सम्पावितं॥ मदीयमेव भवनं भवनेत्र विराजितं॥ ६॥ सुनंद तव
संगेन पापभंगोऽभवन्मम॥ त्वत्संवाद मिषेणात्र दुष्टकृत्य विलोककः॥ ७॥ तव पादांबुजद्वंद्व लोक
नेनास्य वीक्षणे॥ क्षणाद्क्षीण पापौघे भवतः सर्वदानकिं॥ ८॥ अपाय भयदा पारनरकाणां विशे
षतः॥ प्रतिबंधक सामग्री शंभोः पादांबुज स्मृतिः॥ ९॥ नत्कथं जायते पुंसां शांगसंगाद्विना घटत
॥पापांबुधेः कर्णधारः तव संग महोदयः॥ १०॥ पापांधकार दीपो वै शांभवानां समागमः॥ सुगमः
सर्वपुण्यानामागमः सुखसंपदां॥ ११॥ दुर्गमो विपदां प्राप्तो मार्गो निगम चोदितः॥ आगमानां च
महतां तव शम न संभवः॥ विभवैः प्राप्यते पुंभिः पुरुषार्थ चतुष्टयं॥ तुष्टये शांकरणां तु यत्कृतं कर्म पाव
नं॥ १३॥ अर्चनं वंदनं पादसंवाहन मनोधिकं॥ तस्मात्त्वया द पाकार्या मयि स्वस्थेन वै भवेत्॥ १४॥ भवोद्भ
वो महादेवो बलप्रमथनो हि सः॥ सावधानेन विज्ञाप्यो घृणामप्युदिता भवेत्॥ १५॥ शिवधर्म महासूक्ष्म
न जानामि पुनः पुनः॥ नायं जानाति तत्त्वेन चित्रगुप्तोऽपि विगुप्तधीः॥ १६॥ पुनः पुनर्गणैः शैवैः ताडितो बा

धिनोपिच॥ नजानामिसतंधर्मंतेनशंभोद्रुहांवरः॥ १७॥ भविष्यामीतिमनसाचिंतिभेष्यहमतंद्रि
तः॥ तेनधर्मेणशंभोर्वै यांतिपापादिमानगाः॥१८॥ देवदुर्लभमासाद्यकैलासंदर्शिणंविभोः॥ यां
तिनेजितपापौघाओघाइवहिसागराः॥१९॥ त्रिनेत्रचित्रचारित्रंनजानामिगणेश्वर॥ कैलासग
मनेवाकिंसुदुर्लभनरामम॥२०॥ कैलासमौलिवासोपि दुर्लभोद्यत्रमादृशां॥ तादृशानांसदावासोप्र
प्रसादेनमहेशितुः॥२१॥ तस्मात्वयामहेशस्यप्रसादकरणंविभोः॥ अवर्ज्यावर्जेवोधोपिनभवेद्यदि
मेसदा॥२२॥ शंभोप्रसादकोपाभ्यांभीतोदृश्योभवाम्यहं॥ किंवामहत्पुण्यफलैः प्रामागाणाधिपस्य
तां॥ २३॥ कर्मणामनुज्ञाःसर्वेदेवत्वमुपयांत्यपि॥ देवाअपियदीछंतिगणत्वंधूर्जटेःसदा॥२४॥
तेनैवंतपसाशक्यंइष्टापूर्तेर्गणेरपि॥ तत्फलैरपिवास्वर्गेप्राकृतैःकिंकरोम्यहं॥२५॥ भक्तिभाजां
चसुलभोदुर्लभोमादृशांसदा॥ भक्तिप्रियोहिभगवानंबिकापतिरीश्वरः॥२६॥ प्राकृतेनैवभावेनतु
ष्यत्येवमहेश्वरः॥ नमयायोगदानोघैःस्तपसाशक्यतेव्रतैः॥२७॥ कृच्छ्रैर्यमादिनियमैःसमंतु
ष्टोभवेत्प्रभुः॥ सकथंमयितुष्येततदुपायंवदस्वमे॥२८॥ त्वंमेमातापिताचैववसुनंदगणपोत्त
म॥ मदीयंदयचितोनंदयस्वमहेशितुः॥२९॥ करवाणिप्रियंनित्यंमृगशावसुपाणिनः॥ कुरा
धिकारोमप्यद्यमहेशेननिपातितः॥३०॥ पापानांसंगतिर्यस्मादवशाक्रूरचेतनः॥ किंकरोमिक्कगच्छा
मिश्रयेपादयुगंतव॥३१॥ पश्यमांचक्षुषानित्यंसौम्येनत्वंगणेश्वर॥ ॥स्कंदउवाच॥ ॥श्रामनव
दनवाक्यंतन्निशम्यार्थयुक्तंगुणगणसहितंयत्सुनंदोगणेश्वरः॥ विदितसकलभावःशंकरं
तत्वसूत्रेनिगमशिरसिगोप्यंभक्तिभाजांसुगम्यं॥ ३२॥ ॥ इतिश्रीशिवरहस्येईशानाख्येदशमां
शेउत्तरभागेयमसुनंदसंवादोनामएकचत्वारिंशोध्यायः॥४१॥ ॥ईशानायनमः॥ ॥श्रीस्कंदउवाच॥

यमस्यवचनंश्रुत्वानंदीगणसत्तमः॥ प्रहर्षंपरमंप्राप्य यमस्यविनयेनवै॥१॥ शिवाज्ञायमुवाचायं
यमस्याथकृतांजलेः॥ ॥नंदउवाच॥ ॥शृणुत्वंयमुनाद्येवशिवप्रीतिकरंनव॥२॥ सूक्ष्मंत्वयानवि
ज्ञानंधर्ममेनंसुसूक्ष्मकं॥ देव्यैशिवेनकथितंकैलासेशंकरालये॥३॥ त्वंदेनचश्रुतंनगजास्येनापि
नश्रवै॥ नंदिकेशेनचमयागणमुख्येस्तदामुदा॥४॥ पार्वत्यैवंपुरापृष्टोमहादेवोभ्युवाचतां॥ ॥देवी
उवाच॥ देवप्रीतिकरंकिंनेप्रसादकरणंरहः॥ यान्नाराहिताःकेनेममत्वंवदशंकर॥५॥ पार्वत्या
वचसातुष्टस्तामुवाचप्रसन्नधीः॥ रहस्यंहृदिसंधार्यगणान्बोधयशंनक॥६॥ ॥शिवः॰॥ शृ
णुपर्णेप्रसादंमेस्लिप्रंयेनभवेन्मम॥ नतेयमस्यवशगाभवंतिमनुजाभुवि॥७॥ तानपर्णेवदा
म्यद्यरहस्यंहृदिधार्यतां॥ अग्निरित्यादिभिर्मंत्रैःभस्मोद्धूलितविग्रहाः॥८॥ नतेयम॰॥ त्रिया
युषत्रिपुंड्रांकाःसर्वांगेषुमहेश्वरि॥ नतेयम॰॥९॥ रुद्राक्षांगदमालाभिर्मुकुटोद्भासिमस्तकाः॥
नतेयम॰॥१०॥ पंचाक्षरजपासक्तानित्यंपंचसहस्रकं॥ नतेयम॰॥११॥ रुद्राध्यायजपासक्ताएकमे
कदशोत्तरं॥ नतेयम॰॥१२॥ शिवलिंगार्चकानित्यमेकवारंत्रिवारकं॥ नतेयम॰॥१३॥ बिल्वार्चनार्चन
पराःसहस्रशतसंख्यका॥ नतेयम॰॥१४॥ प्रदोषेशिवलिंगार्चाःशिवालयविलोकका॥ नतेयम॰॥१५॥
सोमवारेनिशिसदाभुक्तिमुत्सृज्यनेरताः॥ नतेयम॰॥१६॥ शिवक्षेत्रेषुनियमाद्वसंतिशिवपूजकाः॥
नतेयम॰॥१७॥ शिवशंकरसर्वेशप्रसीदेतिवदंतिये॥ नतेयम॰॥१८॥ शिवभक्तार्चनरताःधनधान्यप्र
होवरैः॥ नतेयम॰॥१९॥ नविष्णुसाम्यंशंभोर्वैवदंत्यर्च्येतियेनराः॥ नतेय॰॥२०॥ बिल्वपत्रैर्बिल्वमू
लेलिंगसंपूज्यकानराः॥ नतेयम॰॥२१॥ अयंमेहस्तमनुनाशिवलिंगस्यशानराः॥ नते॰॥२२॥ प्रदोषे
वृषभंगान्नविलोकनपराश्चये॥ नतेय॰॥२३॥ पश्यंतिशिवलिंगस्यपूजामन्यप्रकारिणां॥ नतेय॰॥२४॥

शिवायगोग्रहारामपुष्पारामाणिकुर्वते॥ ननेय०॥२५॥ क्षीरं दधि घृतक्षौद्रमीनयायेभिषिंचते॥ नते
यमं०॥२६॥ नारिकेलाम्रफलरसैरिक्षुयादिरसेनवै॥ नतेयमं०॥२७॥ चंद्रचंदनकस्तूरीयक्षकर्दमलेपकाः॥
नतेयम० ॥२८॥ दीपधूपप्रदागौरिघृतदीपावलीप्रदाः॥ नतेयमं०॥२९॥ नगरागरुसांम्राणिगुग्गुलु
देवदारुदाः॥ नते०॥३०॥ गोप्रदाभूमिदाःशंभोःवस्त्रभूषणदायकाः॥३१॥ सुछत्रचामरादर्शघंटघंटा
प्रदायिनः॥ नतेय०॥३२॥ शिवोत्सवकरागौरिरथेनवृषभेणच॥ नतेय०॥३३॥ नोर्यत्नकप्रदातारोवीणा
शंखमृदंगदाः॥ नतेयमं० ३४॥ नाट्यगानाप्रदातारोनित्यंपर्वणिवाशिवे॥ नतेय०॥३५॥ ग्रहणेविषुवे
चैवव्यतीपातेचवैधृतौ॥ नतेयमं०॥३६॥ संक्रान्तिषुशिवार्चातोमुक्तपापाःसदानराः॥ नतेयमं०॥३७॥
अविमुक्तेवसंतेये गंगास्नानपरानराः॥ नतेयमं०॥३८॥ अंतर्गृहेस्नानपराप्यांमणिकर्ण्योप्लवानराः॥
नतेय०॥३९॥ विश्वेशदर्शनपराअन्नपूर्णार्चकानराः॥ नतेय०॥४०॥ श्रीढुंढिदंडपाणीशभैरवार्च
नकारिणः॥ नतेय०॥४१॥ वीरेश्वरार्चनपराकृत्तिवासेशपूजकाः॥ नतेयमं०॥४२॥ केदारेशत्रिनेत्रेश
पूजकायेप्रदोषके॥ नतेय०॥४३॥ सोमवारेतुमापार्श्वे वृषभध्वजपूजकाः॥ नतेय०॥४४॥ केदारेच
कुरुक्षेत्रेरुद्रकोट्यमरेश्वरे॥ नतेय०॥४५॥ कालंजरेमहाकालेश्रीशैलेत्र्यंबकेस्थिताः॥ नतेय०॥४६॥
अरुणाद्रौकालहस्त्यांदक्षाद्रौगोनगेभ्रुके॥ नतेयमं०॥४७॥ श्रीकंठेमानसरत्नाद्रौजप्येनजेश्वरेवसाः॥
नतेय०॥४८॥ पुष्पदुतोघनेशेचश्रीप्रयाणेचकुंभके॥ ननेयमस्यवशागाभवंतिमनुजाभुवि॥४९॥म
ध्यार्जुनेमंगलेचत्रिकोटौनेजनीवने॥ ननेय०॥कुद्दालेचैवमायूरेघटशाकंनुकेतथा॥ नतेयमं०॥५१॥
नालेश्वेश्वेतविपिनेछायावेदवनेतथा॥ ननेय०॥वल्मीकेलिंगदानेचमदनांतकलेबुकाः॥नतेय०॥
५३॥ रामेश्वरेचहालास्येशुचींद्रेवेदकावने॥ ननेयमस्यवशागाभवंतिमनुजाभुवि॥५४॥ ॥

 ईश्वरउवाच॥ ॥एवंयेनियमाद्दसंतिगिरिजे सद्यापगानेनरा नीरस्क्षेपुचलिंगसस्ससुशिवंयेपी

सकाशिक्ष्यया॥ हीनास्तेरदनैःकठोरवदनैर्याम्यंनपश्यंतिते एवंगौरिरहस्यमेतदधुनाप्रोक्तंरहस्यंतव ५५॥ ॥इतिश्रीशिवरहस्ये ईशानाख्येदशमांशेउत्तरभागेद्विचत्वारिंशोध्यायः॥४२॥ ॥ईशानायनमः॥ ॥गणेशउवाच॥ ॥ सूर्यनंदनदेवेवं पृष्टःप्रोवाचशंकरः॥रहस्यंधार्यनेचित्ते हृतापःस्त्वज्यतांत्वया॥१॥ ॥यमउवाच॥ ॥ केमद्दृश्यानराभूमौभवंत्यपिचनद्दृशाः॥यथाविरोधोनभवेच्छंकरस्यपरात्मनः॥२॥तान्छिक्षयामिनरकैर्गणेशामयिकथ्यतां॥गणपउवाच॥ ॥इममर्थमपिप्राहदेवदेवःपिनाकधृक्॥ ॥देवीउवाच॥ ॥ यमेनत्रासनीयाः केअशास्याःमयिकथ्यतां॥एतन्मेकौतुकंशंभोत्वयागोप्यंनमांप्रति॥४॥ ॥ईश्वरउवाच॥ ॥शृणुपार्वतिवक्ष्यामियमशास्यान्नराधमान्॥ नान्यचिंताभयात्रत्वं त्वयिगोप्यंनविद्यते॥५॥भस्मत्रिपुंड्ररहिताःऊर्ध्वपुंड्रधराश्चये॥ यमशास्याभवंत्येवपतंतिनरकार्णवे॥६॥ रुद्राक्षमालाहीनागालिंदंत्यपिचधारकान्॥यमशास्या॰॥७॥पंचक्षरोज्झितायेत्ररुद्राध्यायजपोज्झिताः॥ यम॰॥८॥शिवक्षेत्रान्यदेशेषुवसंत्यपिचयेनराः॥यमशास्याः॰॥९॥शिवलिंगार्चनाहीनाबिल्वपत्रार्चनोज्झिताः॥ यमशास्या॰॥१०॥विष्णुनाशिवलिंगार्चासमंकुर्वंतियेनराः॥यमशा॰॥११॥ प्रदोषत्यागिनोयेत्रसोमवारेदिवाभुजः॥यमशा॰॥१२॥चतुर्दश्यष्टमीपूजांनकुर्वंतियेनकुर्वते॥यमशा॰॥१३॥शिवनाम्नान्यनामानिसमबुध्यावदंतिये॥यमशा॰॥१४॥ शिवभक्तंविनिंदंतः अन्यभक्तार्चनारताः॥यमशा॰॥ १५॥ शिवक्षेत्रान्यदेशेषुयेवसंतिनराधमाः॥यमशा॰॥१६॥ अविमुक्तंविनिंदंतिविष्णुक्षेत्रप्रशंसकाः॥यमशा॰॥१७॥ शिवेशिवपुराणानांनिंदकायेनराधमाः॥यमशा॰॥१८॥विष्णुस्तुतिपरागौरिशि

वस्तुनिविवर्जिताः॥ यम०॥ १९॥ प्रदोषे विष्णुविप्राणां लोकेकानामजापकाः॥ यमशा०॥२०॥ शिवागा
रप्रदीपं ये च शिवतीर्थप्रपूरकाः॥ यमशा०॥ २१॥ शिवद्रुमाणां छेत्तारः तत्फलादानराधमाः॥ यमशा०॥
२२॥ शिवोत्सवादिषु तथा विघ्नकर्तार एव वा॥ यमशा०॥ २३॥ शिवधान्यापहर्तारो भस्मेगोवेंबराण्यपि॥
यमशा०॥२४॥ शिवनिंदाश्च ये गौरी शिवक्षेत्रविनिंदकाः॥ यमशा०॥ २५॥ शिवरत्नापहर्तारो हेमकं
शास्ये वे शिवे॥ यमशास्या०॥ २६॥ शिववासापहर्तारः नर्तनो छेदकारिणः॥ यमशा०॥ २७॥ शिवया
त्रापराणां वै मार्गघ्नालुंटकाश्च ये॥ यमशा०॥ वेदनिंदापराये च शिवक्षीरापहारिणः॥ यमशा०॥२९॥
शिवभूम्यपहर्तारो गावश्चापि महेश्वरि॥ यमशा०॥ ३०॥ शंभुं विष्णुसमं ये तु त्वां च पश्यंति पद्मया॥ यम
शा०॥३१॥ शिवरात्र्यन्नभोक्तारः शैवव्रतविनिंदकाः॥ यमशा०॥ ३२॥ बिल्वछेदकरा ये च शिवोद्यान
छिदश्च ये॥ यमशा०॥ ३३॥ पंचगव्यापहर्तारः भेत्तारो लिंगमस्तकं॥ यमशा०॥ ३४॥ रथदाहकरा ये च
छत्रध्वजहराश्च ये॥ यमशा०॥ ३५॥ शंखवादित्रघंटानां दुंदुभीनां विनाशकः॥ यमशा०॥ ३६॥ सुवर्णता
म्ररौप्याणि नरा ये कुप्यहारिणः॥ यमशास्याभवंत्येव पतंति नरकार्णवे॥ एवं ते कथिताः साध्वी यत्वां
प्रति दुराचाराः॥ भुंजंति नरकं घोरं प्रतिजन्मनि दुर्भगाः॥ ३८॥ ॥शिव उवाच॥ ॥ एवं महेशानि त
वोदितायं पथाय मस्ये वदानि निस्तरः सदा नेमं भवादुर्भे गरासभोद्भवाभयोद्भवा चाविमुखाः सदान
राः॥ ३९॥ ये काशीं नविंशंति यांति रहिता श्रांति प्रधाना नराः॥ अन्यत्रैव वसंति तत्समकथां निंदं
ति भिंदंति नान्॥ बाणौघे नरके यमालयभटाः छिंदंति तन्मस्तकं धीता द्यानरके कृतांत वशगा
स्ते प्राप्नुवंति ध्रुवं॥ ये काशिकां तां सुकृतैकराशिकां भवांबुधेर्निस्तरणे सुनौकां॥ ४१॥ भूम्यंगनामौ
क्तिकशोभिनासिकां गाहंति नो यत्र हि ज्ञानवापिकां॥ ये काश्यां निवसंत्यशांतमनसो विश्वेश्वराख्यो

नति ध्यानात्लिंगनवं दन्यादिरहिताः भस्माक्षहीनांगकाः॥४२॥ ते नूर्णंनिपतंतिपूर्णफलतोयेन्नपू
र्णार्चनाः॥धुंटेदंडकरस्य पूज्यरहितायेभैरवार्चोज्झिताः॥४३॥ काशींनाशितपातकां दुरितदक्षे
ग्रा हृसंहारिकां दिव्यश्रीमणिकर्णिकांशिवमहाकैलाशनिश्रेणिकां॥नित्यं देवःश्रुतिवेणिकांशिवमहा
देव्याश्वहर्षोत्सुकांपापध्वांतविनाशनोज्वलमहासंदीपिकांभासकां॥४४॥ तत्रत्यामललिंगलोक
ननर्ति ध्यानार्च्ययात्योज्झिताः ते सर्वेपिशिवद्रुहो नरकेसंचूर्णिताः पोथिताः॥ तद्भिन्ने भुविचां
त्यमत्युवशागाः तत्रैवचेद्वैरवः॥शास्तानस्यकशाभिधानजमहद्दुःखंसहेतात्रकः॥४५॥
इतिश्रीशिवरहस्ये ईशानाख्यदशमांशेउत्तरभागेशिवगौरीसंवादेनामत्रिचत्वारिंशोध्यायः॥४३॥
ईशानायनमः॥ ॥ गणेश उवाच॥ ॥एवं सदाशिवेनोक्तं कैलासशिखरे तदा॥पार्वत्यैयमपृष्छं से
शिवस्य हृदयंगमं॥१॥ तुभ्यंमयात कथितं गणान्बोधयसत्तम॥ ततः सचित्रगुप्तोसौस्वगणांपुरतस्थि
तान्॥२॥ ॥ यमउवाच॥ ॥भोचित्रगुप्तगणपान्मदीयान्व्यापयाधुना॥ यमस्यवचनात्तत्रगणा
नाहसचित्रकः॥३॥ ॥ चित्रगुप्तउवाच॥ ॥मागछंतुभ्रमेणात्रभस्मधारिगृहान्प्रति॥मागछंतुभ्र
मेणात्रश्रीपंचाक्षरहृद्गृहान॥४॥ मागछंतुभ्रमेणात्ररुद्राध्यायिगृहान्प्रति॥मागछंतुभ्रमेणात्रलिं
गार्चकगृहान्प्रती॥५॥ मागछंतुभ्रमेणात्रबिल्वांगणगृहान्प्रति॥मागछंतुभ्रमेणात्रप्रदोषार्चकस
द्मनि॥६॥ मागछंतुभ्रमेणैव सोमवारार्चकक्षयं॥ मागछंतुभ्रमेणात्रअष्टम्यर्च्यकसद्मनि॥७॥मा
गछंतुभ्रमेणेवचतुर्दश्यर्चकक्षयं॥ मागछंतुभ्रमेणात्रपिक्षीरपंचामृतप्रदान॥ मागछंतुभ्रमेणेवगंध
कर्पूरदीपदान॥ मानयंतुभ्रमेणात्रशिवोत्सवविलोककान्॥९॥मानयंतुशिवागारे प्रणामप्रक्रमान्नरा
न॥ मानयंतुशिवागारेअंगप्रादक्षिणान्नरान्॥१०॥ दीपदांधूपदांन्नित्यं छत्रचामरदायकान्॥

सुवर्णभूमिगावोन्नदायिनोमानयंतुमां॥११॥ वाद्यनाट्यागनाभक्ष्यभोज्यदान्मानयंतुमां॥ पुष्प
स्रक्बिल्वतांबूलफलदान्मानयंतुमां॥१२॥ रथदान्वषदानश्चंभोः महोत्सवकरान्नरान्॥ मानयं
तुभ्रमेणापिदीपकान्छंकरालये॥१३॥ घृतंमधुतिलंधान्यंतंडुलांन्गुडदायिनः॥ मानयंतुभ्रमेणापि
शिवागेनर्तकान्नरान॥१४॥ वितानवस्त्रघंटानांघटानांदायिनोभटाः॥ मानयंतुभ्रमेणापिशिव
तीर्थाप्लवान्जनान॥१५॥ कुपारामतटाकादिशिवपुष्पवनप्रदान॥ मानयंतुभ्रमेणापिशिवागा
रपरान्नरान्॥१६॥ मानयंतुभ्रमेणापिसद्यजानीरसंक्लितान्॥ नद्यानपोतपूलांगान्लिंगापांगान्नरो
त्तमान॥१७॥ ताम्रपर्ण्यास्तटवसानतन्नत्यलिंगलोककान्॥ मानयंतु॰ श्रीकंठेशविलोककान्॥
१८॥ मानयंतु॰ गोकर्णेशावलोककान्॥ मानयंतु॰ रत्नादीश्वरलोककान॥१९॥ मानयंतु॰ माते
भूतेशलोककान्॥ मानयंतु॰ जयेश्वरविलोकनात॥२०॥ मानयंतु॰ तंजेश्वरविलोकनात॥ मान
यं॰ कुंभघोणेश्वरेक्षकान॥२१॥ मानयंतु॰॥ मध्यार्जुनविलोकनात॥ मानयंतु॰ मंगलेशविलो
कनात॥२२॥ मानयंतु॰ त्रिकोटीश्वरलोकनान॥ मानयंतु॰ कुंद्दालेशविलोकनात॥२३॥ मानयं
तु॰ मायूरेशविलोककान॥ मानयंतु॰ वैद्यनाथविलोककान्॥२४॥ मानयंतु॰ घंटेश्वरविलोककान्॥
मानयंतु॰ श्रीकंठेश्वरविलोककान॥२५॥ मानयंतु॰ श्वेतारणेश्वरेक्षकान्॥ मानयंतु॰ हालास्येश्व
रलोककान॥२६॥ मानयंतु॰ वण्यधीशविलोककान॥ मानयंतु॰ शुचींद्रेश्वरविलोककान॥२७॥ मा
नयंतु॰ पापनाशेशविलोककान॥ मानयं॰ केदारेशविलोककान्॥२८॥ [illegible] मानयं॰ वनखंडे
शलोककान॥ मानयंतुभ्रमेणापिकुरुक्षेत्रेशलोककान्॥ मानयं॰ पुष्करेश्वरलोककान्॥ मानयंतु॰
रुद्रकोटीशलोककान॥३०॥ मानयंतु॰ महाकालेशलोककान॥ मानयंतु॰ अमरेशविलोककान॥

॥३१॥ मानयंतु० सोमेशाद्यैश्वविलोककान्॥ मानयंतु० आवंटेशाविलोककान्॥३२॥ मानयंतु० श्रीशै
लेशाविलोककान्॥ मानयंतु० त्र्यंबकेश्वरलोककान्॥३३॥ मानयंतु० अरुणाद्रीश्वरेक्षकान्॥ मान
यंतु० वृक्षाद्रीशाविलोककान्॥ ३४॥ मानयंतु० गोनगाग्नेशावीक्ष्यकान्॥ मानयंतु० पुंडरीकेशवी
क्षकान्॥ ३५॥ मानयंतु० कालहस्तीशालोककान्॥ मानयंतु० सदा काश्यां चान्यत्रापि भटाम् तान्॥
३६॥ अन्नपूर्णां च विश्वेशं दंडपो भैरवेक्षकाः॥ मणिकर्ण्यां स्नानवाप्यां नित्यं तर्पं हकारिणः॥३७॥
तत्क्षेत्र पदविन्यासान् मानयंतु भ्रमाद्भटाः॥ ॥यम उवाच॥ ॥ कान्तयं ये निवसंति सनंत मुमाकांता
च्युकाः शांकराः पापास्तेपि च भैरवार्भटभटैः संसीक्षणीया हि ते॥ ये काश्यां त्वग ताम तास्व नर
के नोपातनीया हि ते तेषां भैरवयातनानुविहिता विश्वेश्वरस्याज्ञया॥ ३८॥ ॥ इति श्रीशिवरह
स्य ईशानाख्ये दशमांशे उत्तरभागे यमभटानुसमनं नाम चतुश्चत्वारिंशोध्यायः॥४४॥ ॥
ईशानायनमः॥ ॥ स्कंद उवाच॥ यमाज्ञां ते भटाः श्रुत्वा पुनरूचुर्भटा यमं॥ नेरूतांजल
यः सर्वे गदादंडासिपाणयः॥१॥ ॥भटा ऊचुः॥ ॥केचनेयास्तु नरके पातनीयाश्व केवद॥ त्व
द्वाक्यमवधार्यात्र समाद्दास्याम तान्वयं॥२॥ इत्थं गणवचः श्रुत्वा यमः प्राह तदा मुने॥ शृण्वतो
वै गणेंद्रस्य नारकानयनं तदा॥३॥ ॥यम उवाच॥ ॥भस्मत्रिपुंड्रहीनांगाः ऊर्ध्वपुंड्राश्व चक्रिणः॥
तान्पानयंतु नरके घतिघोरेषु सादरं॥४॥ रुद्राक्षाभरणैर्हीनान्रुद्रपंचाक्षरोज्झितान्॥ तान्पान०
॥५॥ रुद्रलिंगानार्चनाहीनान्बिल्वपत्रार्चनोज्झितान्॥ तान्पान०॥६॥ रुद्रक्षेत्रविहीनांगवासान्लिं
गेक्षणोज्झितान्॥ तान०॥७॥ प्रदोषसोमवारार्चा अष्टमीभूतयोरपि॥ तान्पान०॥८॥ शिवनिंदाभक्त
निंदा तद्धनानां च हारकान्॥ तान्पान०॥९॥ भस्मत्रिपुंड्ररुद्राक्षशिवनाम्नां विनिंदकान्॥ तान्पान०

॥१०॥ शिवक्षेत्रेनिवागारेनाशकान्तीर्थदूषकान्॥ तान्पा०॥११॥ धूपदीपान्नभक्ष्याणांगंधपुष्पाक्ष
ताहरान्॥ तान्पातयंतु नरके घोरे सुसादरं॥१२॥ छत्रचामरघंटादि घटेशोपाहिरण्यहान्॥ता
न्पा०॥१३॥ गोभूमिवस्त्रभूषान्नहारान्क्षीररसानपि॥ तान्पा०॥१४॥ भ्रूणहानभिशस्तांश्च शिवस्य प्र
भेदकान्॥ तान्पा०॥१५॥ नर्तकीविधवासंगानोग्रांश्चैव कृतघ्नकान्॥ तान्पा०॥१६॥ व्रतघ्नांश्च सुरापांश्च
अगम्यागामिनस्तथा॥ तान्पा०॥१७॥ बालस्त्री वधकर्तॄंश्च शिवशास्त्रविरोधिकान्॥ तान्पा०॥१८
निंदकान्शिवमाल्यानां बालवत्सगवां दुहान्॥ तान्पा०॥१९॥ ब्रह्मघ्नान्देवलिनाशांश्च शिवागारवि
रोधकान्॥ तान्पा०॥२०॥ विष्णूत्कर्षपरान्सर्वांभोरूत्कर्षासहनान्नरान्॥ तान्पा०॥२१॥ भाष्येः शिवपुरा
णानां निंदकान्पंक्तिभेदकान्॥ तान्पा०॥२२॥ शिवभोज्यान्नरहितान्नेकान्नान्नानि थेयकान्॥ तान्पा०
२३॥ शिवराम्यन्नभोक्तृंश्च सोमवारे दिवाभुजः॥ तान्पा०॥२४॥ पर्वदानार्चनाहीनायेनस्नांतिनदी
जले॥ तान्पा०॥२५॥ माघेकार्त्तिके वैशाखे तुलामार्गशिरस्स्वपि॥ तान्पा०॥२६॥ ताम्रपर्ण्यां सह्यजायां
गंगायां नर्मदांभसि॥ तान्पा०॥२७॥ अप्रदक्षिणकर्तृंश्च प्रणामरहितान्विभोः॥ तान्पा०॥२८॥ कीक
टेष्वेव निवसान्क्षेत्रत्यागान्गुरुद्रुहः॥ तान्पा०॥२९॥ कन्यास्त्रीबालवृद्धानां धनहारान्प्रपापिनः॥ता
न्पा०॥३०॥ सदावार्धुषिकांश्चैव परान्नादान शिवघ्ने॥ तान्पा०॥३१॥ गोरसानां क्रयपरांस्तंडुलक्रयणा
न्नरान्॥ तान्पा०॥३२॥ तिलहोमान्यरुद्रांश्च ह्यन्यार्थे शिवपूजकान्॥ तान्पा०॥३३॥ गोभूसोपस्करा
गाराभतिग्रहपरान्द्विजान्॥ तान्पा०॥३४॥ पर्वण्यन्नभोक्तृंश्च क्षेत्रश्राद्धविवर्जितान्॥ तान्पा०॥३५॥
नित्यं प्रतिग्रहपरान्निंदाकान्पिशुनानखलान्॥ तान्पा०॥३६॥ नित्यं दंभपरान्स्तेनाननिंदानगरदा
न्नरान्॥ तान्पा०॥३७॥ भार्यापुत्रपरित्यागान्नित्यं दुर्भिक्षचिंतकान्॥ तान्पा०॥३८॥ अभक्ष्यभक्षणा

पेयानगनीनाश्च मद्यवर्जितान्॥ नान्या०॥३९॥ एकादश्यन्नभोक्तृंश्च राजानश्चाप्यरसकान्॥ नान्यान यं तु
नरके घ्वति घोरेषु सादरं॥४०॥ वेदपानर्धक्रयपरानश्रुश्चपृंश्च पादजान॥ नान्या०॥४१॥ क्षत्रियांश्च रणेभी
तान्यस्तशस्त्रपलायितान्०॥ नान्या०॥४२॥ नाना हार विहारांश्च उक्तक्षेत्रेषु पातकान्॥ नान्या०॥४३॥
शिवोन्नवशिवोद्यानयतिविप्रादिनिंदकान्॥ नान्या०॥४४॥ वेदवाक्यान्यथाकर्तृंस्तेन्निंदास्मृतिनिंद
कान्॥ नान्या०॥४५॥ न्यासापहारकान्दुष्टान् शिवलिंगप्रतिग्रहान्॥ नान्या०॥४६॥ अन्नतांस्तेयिनः क्रू
रानभिशस्तांश्च नस्करान्॥ नान्या०॥४७॥ ऊर्ध्वपुंड्रेण देवानामर्चकान् रुद्रजापकान्॥ नान्या०॥४८॥
चक्रांकिशिलया सार्धं शिवलिंगं समर्चकान्॥ नान्यान यं तु नरके आनयं तु ममाज्ञया॥४९॥ ॥ स्कंद उवा
च॥ ॥ एवं धर्मः स्वानतु ज्ञास्य शैरिः गणेंद्रमुखेन समन्वित स्तदा॥ स चित्रगुप्तो विनयेन तं तदा संपूज
यामास विभोर्गणेंद्रं॥ ५०॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे पंचचत्वारिंशो
ध्यायः॥ ४५॥ ॥ [illegible]॥ ईशानाय नमः॥ ॥ स्कंद उवाच॥ ॥ ततः मुनंदः सानंदं यमेनेत्थं सुपूजितः॥ वि
श्रांतश्च प्रसन्नश्च तमाह सुकृतांजलिं॥ १॥ ॥ मुनंद उवाच॥ ॥ धन्योसि त्वं सदा मान्यः सर्वेषां धर्म
राडसि॥ शिवपादाब्जभृंगोसि शिक्षकोसि विधेर्ध्रुवं॥ २॥ न त्वादृशो धर्मवेत्ता सभ्याश्च मे सदोज्वलाः॥
मुनयो विनयोपेता धर्माधर्मविचारकाः॥ ३॥ हारकाः सर्वपापानां सूक्ष्मशास्त्रार्थनिश्चये॥ भवल्लोक
मिमं द्रष्टुमागतोस्मि शिवाज्ञया॥ ४॥ दृष्टो हि नरको घोरो दुस्तरोयं शिवद्रुहां॥ उग्रोप्यनुग्रो भक्तेषु उग्र
एव शिवद्रुहां॥ ५॥ स्वभावतो महादेवः सहमानो दयानिधिः॥ स्वभक्तकृतपापानि नाशयत्येव सर्वथा॥
६॥ काशेन स्वमपीतस्य जलस्य रसणं यथा॥ तथा शेवकृताधानि नाशये दिंदुरवं उधक॥ ७॥ यथांधतमसो
रासिं नाशयेत प्रभाकरः॥ तथा घांभवपापानि नश्यंते तूलवह्निवत्॥ ८॥ मनस्य जीवनोवापि शिवभक्तस्य

श्रीशिव·

वै यम ॥ नत्वं शास्ता शिवः शास्ता नन्वपश्यश्च मादपि ॥ ९ ॥ शिव इत्यक्षरद्वंद्वं भर्जिनाखिलपातकं ॥ नदुः
खफलदं भूयादुग्रबीजं यथोखरे ॥ नदा हर हरेशान महादेव प्रसीद मां ॥ नरकानुक्षरहरेत्युक्तोशदूण
पोनमः ॥ ११ ॥ येन तन्नयातनानां संरुद्धा महापापोपपातकैः ॥ शिवशब्दश्रवणतः तेप्युच्चार्यायदुःखिनः ॥ निस्ता
रवह्निनेदुःखेनिरयेपान्निताः पुरा ॥ दिव्यदेहधराः सर्वे महार्हवसनार्हणाः ॥ १३ ॥ विमानमास्थिताः सर्वे
शिवद्रोहिविनासदा ॥ येचान्यपातकायांति कृतांतस्येव पश्यतः ॥ पश्यतश्चित्रगुप्तस्य भटानां तत्र पश्यतां ॥
व्यापाररहिताः सर्वे भटा आसन्यमस्य तु ॥ १५ ॥ तान्प्रमोच्य यमेनाशु सुनंदः पूजितो ययौ ॥ सुनंदं प्रांजलिः
प्राह विनयेन यमस्तदा ॥ १६ ॥ ॥ यम उवाच ॥ ॥ शिवनाम्नः प्रभावं हि कोजानाति शिवं विना ॥ त्वयेत्यंना
रिताः सर्वे निर्यापारेस्मि सांप्रतं ॥ १७ ॥ मामाज्ञापय रुत्यं मे किं वा चैव करोम्यहं ॥ ततो गणेश्वरः प्राह स्म
हृष्टिपथ पूनकाः ॥ १८ ॥ नारकायदि वेषां तु शिवनाम्नः प्रभावतः ॥ कोवेदास्य प्रभावं वै शिवनाम्न इनात्मज ॥
॥ १९ ॥ पुनः पुनश्च पूर्णस्ते नरकः संभविष्यति ॥ अविश्वासपरा यांतु लवाधनरकालयं ॥ २० ॥ मातेभूत्तववे
दुःखं शिवद्रोहाद्भविष्यसि ॥ येत्यक्षविमुखा पापाता न्धिक्षयमुदुर्मुहुः ॥ २१ ॥ युगे युगे मदीयाज्ञां पाल्य
तां रविनंदन ॥ स्वस्तिनेस्तु गमिष्यामि त्वमत्रैव वसाधवे ॥ २२ ॥ इत्युक्तो गणपं प्राह यमः प्रांजलिरत्र तु ॥ ॥
यम उवाच ॥ ॥ पुनः पुनः समागत्य मां शिक्षय गणेश्वर ॥ यथा मे शिवभक्तार्थ्यो निष्ठा भूयात्तथा कुरु ॥ २३ ॥
दययापाल्यनाचार्यं जनो मां शरणं गतः ॥ विमानस्थो गणेशानं प्रणम्याभ्यागतो यमः ॥ २४ ॥ सन्तथेत्यनुमान्या
थ यमं तत्र सनंदकः ॥ पश्यन्शिवद्रुहां दुःखं यातनाय मकारितान् ॥ २५ ॥ विदूयमानहृदयः सदयस्तान्गणे
श्वरः ॥ तेषां माक्रंदवचनमस्मान्मोचय पश्यनः ॥ २६ ॥ ॥ शिवद्रुह उवाच ॥ ॥ नपक्षपातः कर्तव्यः त्व
क्षपादांबुजार्चक ॥ ततस्तानाह दुःखेन सुनंदो गणपुंगवः ॥ २७ ॥ चिंतयानो मुहुः सांबं खेवाणीमग्रणे ॥

नदा॥२८॥ ॥वाणिउवाच॥ ॥ त्रिकोटिशिवनाम्नावैसमुद्धार्यशिवद्रुहः॥सोद्यंतत्कालपर्यंतंदुःखमत्र
यमालये॥२८॥ पश्चात्तापविशुद्धात्मेशिवध्यानाच्छिवद्रुहां॥मुक्तिर्भवतुचान्यत्रउपायस्तेषुमोचनं॥
॥२९॥ ततोसुनंदस्तान्तत्रश्रावयामासतद्वचः॥ ॥ सुनंदउवाच॥ ॥ हाभवद्भिःशिवद्रोहःकृतोभुविम
हत्तरः॥ तत्रापश्चितनात्र्ययोयंघोरोद्रोहोयमीशितुः॥३०॥ किंचित्कालंवसंत्वघनिरयेयातनाघने॥
मनसाध्यायतशिवंत्रिकोटिशिवनाम हे॥३१॥ विश्वासेनजपःकार्यः तेनमुक्ताभविष्यथ॥ निस्तीर्ण
नरकाद्रूपंधुनर्गं छत मेदिनीं॥३२॥ स्थावरंजंगमंवापिदेहंगत्वाततमाचिरं॥ यथाकथंचित्निस्तारोभव
तांसंभविष्यति॥३३॥ इत्युक्त्वाचगणश्रेष्ठोवृषभध्वजशोभिना विमानेनार्कभासार्कंमप्युलंघनसोगणः॥
रभसासतमायातोमहसाभासयंदिशः॥ततःकालेनमहतानारकास्तेशिवद्रुहः॥३४॥ त्रिकोटिशिवना
म्नोनेजपाध्यानात्महेशितुः॥मुक्तपापाभुवंप्राप्यजाताद्रुमलतांडजाः॥३५॥तासमेभाश्वरवभाद्युन
काश्चशिवास्तथा॥ ॥स्कंदउवाच॥ ॥ एवंसुनंदोथयमप्रशास्यसंपत्रयतान्वैनरकाच्छिवद्रुहः॥उच्चा
र्यसंश्राव्यमहेशनामययौविमानेनमुदार्कभासा॥३६॥ ॥इतिश्रीशिवरहस्येईशानाख्येउत्तरभागे
शिवगौरीसंवादेनरकोद्धारोनामषट्चत्वारिंशोध्यायः॥४६॥ ॥ ईशानायनमः॥ ॥मुनिरुवाच॥
शिवनामप्रभावेनतन्निस्तीर्णास्तेशिवद्रुहः॥ क्वगतोचसुनंदोयतन्मेस्कंदवदाधुना॥१॥ ततोययौसके
लासंदक्षिणंसगणेश्वरः॥आजगामानपताकेनविमानेनार्कशोचिषा॥२॥ रत्नमालावलंबेनवृषभध्वज
शोभिना॥ चलत्पताकानिचयचामरादर्शशोभिना॥गणैरन्यैःपरिवृतःसुनंदोनंदितांतरः॥शिवपादां
बुजध्याननिहताशुभसंचयः॥४॥ मेरोःसमस्तेंपश्यकैलासंसगणेश्वरः॥गोपुरैर्बहुसाहस्रैरत्नस्फटि
कसंभवैः॥५॥प्राकारैःपरिघैःशुभ्रैःमहाकैलाससप्रभैः॥भवनैर्मणिसंक्लृप्तैःपर्वोघच्छशिसंन्निभैः॥६॥

पद्मवर्णैर्हरिवर्णैर्महानीलमणिप्रभैः॥ गोमेदवर्णैरपरैः पुष्परागमयैरपि॥७॥ महामरकतागारैः
सुधांशुधवलांतरैः॥ हंसाकारैर्वयाकारैः सिंहाकारैर्मनोहरैः॥८॥ गोपुरैर्भासुरैस्तत्रभूधराकारसौध
कैः॥ गवाक्षवलभीनिर्यत्पाराव्रतगणायुतैः॥९॥ शुकैर्हंसैर्मयूरैश्च चक्रवाकोपकूजितैः॥ परभृतसार
सारावैर्विनादितगृहामुखैः॥१०॥ मयूरकेकाभिरवैर्दात्यूहकुलनादितैः॥ गिरिंद्रशिखराकारवार
णैर्मेघसन्निभैः॥११॥ हयारिसंघैर्विविधैः कोलदंष्ट्राक्रमूनलैः॥ न्यंकुसंघैश्च चमरपुच्छभारविधून
नैः॥१२॥ मगेंद्रशार्दूलविमुक्तैः लीलापांगेष्वन्नांबरैः॥ संवृतापारशिखरं कैलासं दक्षिणं तदा॥१३॥ उर
गेंद्रफणारत्नकांतिकांतिनादिकैः॥ सिद्धविद्याधरगणैः किंनरीगीतनादितैः॥१४॥ अप्सरोगणसं
गीतमृदंगध्वनिशोभितैः॥ मेघधारैश्च विपुलैर्नत्यत्केकिगणारवैः॥१५॥ देवगंधर्वसदनैः धावागा
रैर्मनोहरैः॥ सरोवरैः स्वच्छनीरैरुत्फुल्लकमलोत्पलैः॥१६॥ नत्के मरालगणैः पुष्पपादपोद्भूतमारुतैः॥ सं
चरद्भिर्मणिमयवालुकापुलिनैरपि॥१७॥ स्वच्छादर्शतलाकारशिलातलभुवस्तटैः॥ स्वच्छाच्छशीतल
छायावरोरुविटपैरपि॥१८॥ कोविदारमहाशाखाविदारितनभस्तटैः॥ कर्णिकारैः पाटलैश्च क
दंबैः सर्जकैरपि॥१९॥ लोध्रैर्बिल्वैश्च बकुलैर्नारिकेलैः फलानतैः॥ रंभाम्रपनसैर्भल्लैर्वेणुभिर्ध्व
निपूरितैः॥२०॥ दाडिमैश्चैवाशोकैश्च फुल्लबंधूककेसरैः॥ नागपुंनागहिंतालैस्तालैः फलभरान
तैः॥२१॥ मंदारितनभोमार्गैर्बिल्वैः फलसुभारतैः॥ अशोकैस्तबकैर्युक्तैः कोविदारैः सुपुष्पितैः॥
२२॥ देवदारैश्च नगरैः नालिंगैर्मातुलिंगकैः॥ फलपुष्पच्छदभरैरपारैर्मधुकैरपि॥ तत्रदक्षिण
कैलासे आलुलोके गणेश्वरः॥ तत्रोपवनभागेषु विहरंतिचशांकराः॥२४॥ स्रग्गंधपुष्पाभरणै
र्मनोज्ञाधनत्रिपुंड्राक्षसरैः समुज्वलाः॥ प्रासादमंचेषु सुरुद्रकन्यांकरागवीणाध्वनिभिः सु

 हर्षिताः॥ २५॥ शिवादिव्यदेहे मधुरैः शुकास्यगैः ॥ अर्णवंनिभस्येमधुरैः फलादनैः॥ सुधांपिबंतोत्रसु

धांशुधारकाः प्रहर्षितारुद्रगणैः समर्चिताः ॥२६॥ येधूपदाः शंकरमंदिरेभुवि दीपप्रदागंधसुमंफल

प्रदाः॥ शिवालयेप्रक्रमणैर्नतिस्तुनि समर्चकालिंगशिरःसुबिल्वकैः ॥२७॥ प्रदोषपूजादिकराश्चि

वस्यशोवस्त्रप्रदाछत्रसुचामरप्रदाः॥ वितानघंटासुघटप्रदायकाः शंभोनिवेद्यान्नभुजोत्रशंकराः॥

२८॥ गोभूहिरण्यांबरदामहेश्वरे विभूतिरुद्राक्षसधराश्चहाराः॥ शिवालयेकूपसुतीर्थवापिका

पुष्पाद्यसत्स्नानजलप्रपुरप्रदाः॥ २९॥ प्राकारसंस्मंटपगोपुरादिकर्तारएवात्रवसंतिभक्ताः॥ येत्रां

भवंधर्ममिदंभुवि स्थिताः कुर्वंतिभक्ताशिवसंमतायो॥३०॥ वसंतिनित्ये वसुदक्षिणेमहत्कैलासशो

लेगणपैः समर्चिताः॥ तेदेवभोगादधिकंचभोगंभुंजंतिनित्यंयथाशिवप्रसादतः॥ नान्दिवश्यनत्रैवतन

दासुनंदोविमानगः नैश्वननेतायपूजितः॥ नदेशपूजार्थमवानरद्रुणैः विमानैवर्येणसमेरुमस्तकं

॥३२॥ समानसेनत्रसरोवरेगणैः पुष्पाणिसंपाद्यफलानिबिल्वैः॥ स्नात्वासमभ्यर्च्यधृतत्रिपुंड्रोरुद्रा

क्षमालःशिवलिंगमेशं॥३३॥ धूपैश्चदीपैर्वरपंचगंधैरामेचनैर्गंधजलाभिषेकैः॥ निवेद्यभक्ष्यैः

सफलैर्मनोहरैस्तांबूलनीराजनशंखमर्द्दलैः॥ ३४॥ सत्काहलैर्दुंदुभिनादघोषैर्जयेशशंभोपरिपा

हिमामिति॥ ॥ इतिश्रीशिवरहस्ये ईशानाख्येदशमांशेउत्तरभागेसुनंददक्षिणकेलासागमनं

नामसप्तचत्वारिंशोध्यायः॥ ४७॥ ॥ श्रीईशानायनमः॥ ॥ स्कंदउवाच॥ ॥ नंदानन्काहल

रवंशंभोः पूजावसानके॥ सुनंदस्यगणैर्द्रव्यभ्युत्वावेमेरुमस्तके॥ हर्षभारसमाक्रांतोईशानोप्यग

णेश्वरैः॥ शंकरस्यापरामूर्तिः शिलादजइवामलः॥२॥ धृतभस्मत्रिपुंड्रोकोरुद्राक्षावलिशो

भितः॥ मगबाणगदाटंकशशिधकुधवलछविः॥३॥ त्रिनेत्रोनीलकंठश्वसपार्श्वेधृतचामरः॥ श

शिप्रभेण छत्रेण कांचनश्चाविदंडिना ॥ ४ ॥ शोभमानो गणेंद्रो धैः विमाने नार्करोचिषा ॥ वृषभध्वज
शोभांकचित्र घंटान्वितेन सः ॥ ५ ॥ समभ्यगात्कुबेरेण यक्षैः व्यक्षपदार्चकैः ॥ तदोत्तराशापतिनास्व
यमेशान्यद्दिक्पतिः ॥ ६ ॥ तेनेशानेन हि पुरा देवः सख्यमकारयत् ॥ सुकुबेर सखोभूत्वा केलासंद
क्षिणं मुने ॥ ७ ॥ सुमेरुशिखरस्थं वै पाल्यं यं शंकराज्ञया ॥ शिवधर्मरतो भक्तान्भोगैस्तदनुरूप
कैः ॥ ८ ॥ सभोजयत्स्वगणपैः शिवभक्तान्युगेयुगे ॥ पातितत्र स देशानः केलासं दक्षिणं सदा ॥ ९ ॥
तत्रागतमुपश्रुत्य सुनंदं गणपोत्तमं ॥ मत्वा तु आगतं शंभो रंतरंगं गणेश्वरं ॥ अनुनंदिनमासा
द्य हर्षभारेण भूयसा ॥ महसा भासमानो सौ कुबेरेण समं तदा ॥ ११ ॥ यक्षैर्गणेश्वरैश्चैव शिवभक्तै
र्महात्मभिः ॥ शिवधर्मप्रभावेन येवेतत्र समागतैः ॥ १२ ॥ भूतलात्तैर्गणाकारैः भोगभाग्यधुरंध
रैः ॥ गंगाधरार्चकैः शांतर्विमानै रुज्वलप्रभैः ॥ १३ ॥ तेवतेरु विमानाग्रैः सुमेरुशिखरे तदा ॥ पूज
यंतं महेशस्य लिंगं तत्र सुनंदकं ॥ १४ ॥ सुमेरुशिखरोद्भूतबिल्वमूलास्थितं तदा ॥ धृतभस्मत्रि
पुंड्रांकं रुद्राक्षस्त्रगलंकृतं ॥ १५ ॥ चंद्रार्धखंडोत्तमांगं लंचंद्रचूडार्चकं तदा ॥ गणेश्चैव वदतं तत्र
सुनंदं नंदिनोपमं ॥ १६ ॥ पश्यंतो पयतुस्तत्र ईशानो धकुबेरकः ॥ अभ्यर्णमागतो दृष्ट्वा सुनंदो
गणपोत्तमः ॥ १७ ॥ तूर्णमुत्थाय सानंदमालिलिंगे च तौ तदा ॥ भुजाभ्यामथ पीनाभ्यां ईशानं यक्षना
यकं ॥ १८ ॥ सिंहासने चूपविश्य स्वैः स्वैः परिवृतो गणैः ॥ मुदेशान सुनंदौ च कुबेरेण तदा मुने ॥ १९ ॥
ऊचुस्ते कुशलप्रश्नं स्नेहभार पुरःसरं ॥ तमुवाचांजलिं कृत्वा ईशानो यक्षराडपि ॥ २० ॥ ॥ ईशान
उवाच ॥ ॥ सुनंद नंदिन हृदा त्वत्समागमनोत्सुकः ॥ शिवोयं संगमो भाति चावयोः सुखदायकः ॥ २१ ॥
भवभक्तो गसंगोयं पापभंगाय जायते ॥ मुक्त्यंगनायाः संगोयं त्वदपांगावलोकनं ॥ २२ ॥ अद्यैवायंम

हामेरुः धन्योमान्योगिरिव्रजे॥ यथागुरुत्वेहिमवान्पार्वत्यागिरिशाद्विभो॥२३॥यथागौरीशा
वसतिर्महाकैलासउत्तमः॥तवपादांबुजस्पर्शात्शंकरांघ्रिसमागमात्॥२४॥धन्योयंमेरुशीशा
ननिवासोमम दक्षिणः॥कैलासः शिवभक्तानांनिवासायशिवेनहि॥२५॥ तेषांभोगप्रदानायसं
स्थितोस्मिशिवाज्ञया॥भवदागमनेहेतुंनधाहमुपलक्षये॥२६॥महाकैलासगामीलोतेनिवासःशं
करांग्रतः॥तवापागमनेहेतुंनतर्कैरुपलक्षये॥२७॥कुबेरोयक्षराडत्रसरवायंममपार्श्वगः॥महे
शेनकृतंसख्यमुलराशापतिस्त्वयं॥२८॥अहंचेशानदिग्भागेशिवभक्तार्चकःसदा॥निवसामिम
दाज्ञोत्तमेरौसर्वसुरालये॥२९॥अयंदक्षिणकैलासःसुमेरुःशिवरवेश्रयः॥ शिवभक्ताहिभुवियेशि
वधर्मप्रकुर्वते॥ तेषामत्रैववसतिःकृतावेधाधुनापुरा॥युगेयुगेगणेंद्रेशाशिवभक्तप्रपूजया॥३१॥
तेषांभोगप्रदानेनपावनोहंसदैवहि॥भवदागमनेनापिमहाशांभवपूजया॥३२॥धन्योस्म्यनुग
हीतोस्मिमहाशांभवसंगतः॥महेशदर्शनेयावत्तावत्त्वद्दर्शनान्मम॥३३॥प्रीतिरुत्पादितावात्रन
जानेसुरुतंमया॥किंकिंकृतंपुण्यजालंमयातवसमागमः॥३४॥चिरायरवलुमेपूर्णोपचेस्तिमम
नोरथः॥ यथाशैवांगसंगात्मआनंदांबुधिवीचयः॥३५॥उल्लोलाःसहसायांतितथामन्मानसांबु
धिः॥नवसंदर्शनापारतरंगाकुलमुन्नतः॥३६॥भवत्येवमहादेवरूपयाममसांप्रतं॥ तवदृष्टिपथं
प्राप्यपरिपूर्णमनोरथः॥३७॥भवभक्तार्चनफलंसफलंजातममयमे॥सुनंदनवमानंददर्शनेसफ
लंमम॥३८॥उत्फुल्लकमलाकारलोचनानिनयंसदा॥भवान्महादेवगिरौमहाकैलासमौलिगः॥
॥३९॥वयंदक्षिणकैलासेसंस्थितागणपोत्तम॥ तवभाग्यस्यनांतोस्तिनित्यमभ्यर्णगोविभोः॥
॥४०॥सर्वदासंस्थितःपुत्राः दूरगोहिसदाविभोः॥अभ्यर्णगःसेवकोहिसेव[illegible]याप्रीतिदोभवेत

॥४१॥ तथा त्वयि महेशस्य प्रीतिर्दृढतरी भवेत्॥ अमरं गणनेंद्रोसि नंदिकेशसमो ह्यसि॥४२॥ त्व
द्दयापात्रभूतोस्मि पाल्यतामतमाचिरं॥ पश्य त्वमत्र कैलासे पूजिताः शिवशासनात्॥४३॥ भस्मरु
द्राक्षपूतांगा रुद्रपंचाक्षरादराः॥ शिवलिंगार्चकाः शैवाः शिवोत्कर्षार्थवादिनः॥४४॥ सदा शैवपु
राणानां श्रोतारः सर्वदा भुवि॥ बिल्वैः पुष्पैः सदा लिंगे बाणे स्फटिकरत्नजे॥४५॥ हेमे रौप्ये कांस्यजे
वैषे तल्लेखिकतामदि॥ कृत्वा लिंगानि भुवि ये पूज्य चात्मयार्चिताः॥४६॥ निवसंति सदा पूताः प्य
त्राराध्य महेश्वरं॥ कल्पकोट्याव संत्येते कैलासे मम दक्षिणे॥४७॥ एते प्रदोषनिरताः सायं शिवप
दार्चकाः॥ सोमवारे शिवः सायं एतैः संपूजितो भुवि॥४८॥ अष्टम्यां पूजयित्वेशं चतुर्दश्यां निशि
प्रभुं॥ संपूज्य बिल्वकुसुमैर्धूपदीपैश्च नैवेद्यैः॥४९॥ पूजइत्वा वसंत्यत्र भुक्ताभोगसमन्विनः॥
धूपदा दीपदाश्चैते पुष्पभक्ष्यान्नदायकाः॥५०॥ छत्रध्वजपताकादि घंटादर्शप्रदायिनः॥ पंचामृतप्र
दाश्चैते पंचगव्यप्रदायिनः॥ शिवलक्ष्मकराश्चैते प्राकारं गोपुरं विभोः॥ लिंगप्रतिष्ठाकर्तारः अष्टबंधवि
धायिनः॥५१॥ प्राकारकारकाश्चैते मंटपादिकराः शिवे॥ शिवोत्सवकराश्चैते पुष्पमालाप्रदाः परे॥
५२॥ रथोत्सवादिकर्तारो वाहनादिकरास्तथा॥ शिवपुष्पवनानां च कर्तारोत्र सुपूजिताः॥५३॥ नारि
केलमधूकानां तथैक्षुवनकारिणः॥ लिकुचाम्रादिपनसवनादिकरणाद्विभोः॥५४॥ शिवभक्तार्चकाश्चै
ते गोग्रहा वरधान्यकैः॥ शिवायतनप्रदातारो वस्त्रभूमिप्रदास्तथा॥५५॥ वितानछत्रदातारो रत्नभूषण
हेमदाः॥ गंधदाः क्षीरदधिदाः घृतक्षौद्रसिताप्रदाः॥५६॥ तौर्यत्रिककराश्चैते नृत्यनारीप्रदायकाः॥ शं
खदुंदुभिदातारो वीणामर्दलदायकाः॥५७॥ शिवालये कांस्यघंटाघटदादर्शदा शिवे॥ दीपमालाः प्र
दातारः घृताक्ताः कार्तिके शिवे॥५८॥ सांद्राणि गुग्गुलूदाना नगरागरुदायकाः॥ पा[illegible]टलो नीरचंद्रा

क्तसुरभीतलजलप्रदाः॥५९॥ ग्रीष्मे गलंतिदातारः शिवलिंगस्य मूर्धनि॥ ध्वजदातार एवात्र पताकावृषभांकिताः॥६०॥ नवधान्याक्षताः शंभोः प्रदातारोत्र आसने॥ नवरत्नप्रदातारो हेमबिल्वप्रदायकाः॥६१॥ सुवर्णकमलौघादिमालादातार एव ते॥ नीलोत्पलाब्जबिल्वानां मालादातार एव ते॥६२॥ चंद्रकस्तूरिदातारो तांबूलादिप्रदायकाः॥ एलालवंगजातीनां फलपत्रप्रदायकाः॥६३॥ गोशृंगरौप्य दातारो शिवलिंगाभिषेचने॥ हंसकुंदेंदुसंकाशचामरादिप्रदायकाः॥६४॥ ग्रहणे पर्वकालेषु पूजाकाराः सदाशिवे॥ उद्वर्तने लेपितानां दातारो त्र शिवस्य वै॥६५॥ शिवस्तुतिपरा ये ते शिवलिंगाग्रनर्तनाः॥ शिवप्रदक्षणपरा सोमसूत्रांगलोलकाः॥६६॥ नत्वा नत्वा शिवागारे प्रदक्षिणपरा नराः॥ सहस्रनामनः शंभोः बिल्वपत्रसुमार्चकाः॥६७॥ एवं सर्वत्र भूलोके शिवधर्मकरा नराः॥ त्यक्त्वा देहं विमानेन यांति मद्गण पूजिताः॥६८॥ दिव्यदेहाः दिव्यगंधपुष्पाभरणवाससः॥ हेमरत्नांगभूषाभिः भूषिता मधुरस्वरैः॥६९॥ नृत्यं नृत्य प्सरसो नित्यं चामरै रभिवीजिताः॥ वर्षन्तु पुष्पासारेषु नदभेरीगणेषु च॥७०॥ शंखेषु ध्मायमानेषु यांति दक्षिणमुत्तमं॥ कैलासं शंभुना पूर्वं निर्मितं विश्वकर्मतः॥७१॥ शिवभक्तनिवासार्थं मद्गणै रभिपूजिताः॥ वसंति ते नत्र भोगाढ्या मया शंभोराज्ञया॥७२॥ समर्चिताः सुभोगाढ्याप घयत्वं गणपुंगव॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशोत्तरभागे सुनंदयमसंवादे नाम अष्टचत्वारिंशोध्यायः समाप्तः॥४८॥ ॥ ईशान उवाच॥ ॥ एते भक्त नामहेश्वरदयापात्रास्त्रिनेत्रप्रियारुद्राक्षाभरणास्त्रिपुंड्र विलसत्फाला महेशार्चकाः॥ नक्ताशा भुवि सोमवासरचतुर्दश्यष्टमीषु ध्रुवं अस्तं दोषकरे प्रदोषसमये बिल्वार्चकाः शांकराः॥१॥ एते त्रेव वसंति भोगविभवैः भाग्यं गभोगार्च्यकाः॥ एते शांकरसद्मनि त्रिभुवनाधीशस्य लिंगार्चनध्याने सा विहितप्रणामर

चनाप्रादक्षिणाकारिणः॥ सायंपुण्यतमे प्रदोषसमये प्रातश्च मध्यान्हके तत्रैव द्विभुजो वसंतिनियता
स्तत्तीर्थपानादराः॥ दाराहारविहारके हर हरे त्युक्तोशकाशीकरं नामैव प्रथमं वदंतिभवितेनेनात्रपू
जागणेः॥३॥ भस्मत्रिपुंड्रपरिमंडितफालदेशा रुद्राक्षा रुद्राक्षमालाधरहारकोटराः गंगाधराश्चंद्र
कलललामावसंतितान्यपश्य गणेंद्रसततम पंचाक्षरीजपपराश्चियमात्रिकालं रुद्रार्थवादमहिमाविद
जापिनोत्र॥४॥ भस्मांगकाः श्रुतिशिरप्रणवप्रधानाः शिवार्चकाचान्यसुरार्चनोज्झिताः॥ स्वन्येपिशंकर
शिवेतिवदंति येनेनान्यंमनोध्यायतिधन्यमेषां॥५॥ संधुक्षिताध्वनिचयाविषमाक्षलिंगसंपूजकाः
त्रिदलकोमलबिल्वपत्रैः॥ एतेविमुक्तनिवसाबाधिधाम जूटपूतोद्भवा श्रुतिनिरस्तसमस्तपापाःवि
श्वेश्वराद्य करुणावरुणालयाढ्य नारंगसंघवलिताश्रिलिताःशिवांगं॥७॥ एतेन्नपूर्णापदपूजन
तत्परावे श्रीढुंढिदंडकरभैरवमाधवार्चाकुर्वंतितेशिवमहेशसुपात्रयेवकालंनयंतिचवदंतिमहे
शनाम॥८॥ ऐतेकेदारमौलौ शशिधरमहसोधारकेशास्तुतिभिर्नीतरेनेर्दिवसोत्र तन्निवसन्नित्य
मंगमेवेसदा॥ एतेकामदवैद्यनाथमगजाकांतंसुरांगांभसोभारं स्कंधगतं वहंतिनियतंसिंचंतितत्
न्मस्तके॥९॥ माघेप्रयाग्राप्लुतिधूतपापासुमित्रजावारिणीहारीणीअंहसां॥ जयेश्वरस्यशिवसत्यम
हेशधाम प्रादक्षिणान्निधिभुजः शिवलोकभाजः॥१०॥ मालूरमूलशिवपूजनसक्तचित्ताः त्यक्ताघशै
लनिचयाश्शुचयोत्र संस्थाः॥ ब्रह्मांडभांडस्थिततीर्थखंडान्यायांतिसर्वाणिववस्यचांडं॥ नरःकराभ्यां
स्पृशतेविषाणयोर्मध्यप्रदोषे ह्यभिवीक्षितेशं॥११॥ तीर्थाप्लुतीनामयुतायुतानांफलप्रपद्येवशिवप्रसा
दभाक्॥ श्रीशैलेपिचत्र्यंबकेभुविनराःगोदाप्लुतिंगागुरोसिंहस्थेवरतोलिभास्करयुतेमायूरकेसघ
नां॥१२॥ वारिण्याप्लुतविग्रहाः शिवशिवाकाशीसदाघसंत्रासकाः॥ माघ्यामप्यविशेषतोहरिगतेदेवेज्य

कुंभेश्वरागारे पुण्यसरोवरासु ॥ नश्वरीरावेशिवे स्नानरताः ॥ १३ ॥ निष्यविशिष्यशिवदर्शनधूतपापाम
ध्यार्जुनेशपविवीक्षणतोपिपुण्ये ॥ स्नानात्कवेरजनितारमणीयवारिण्याधाम्नुतानरवरानिवसंतिचा
त्र ॥ १४ ॥ एनेत्रनाम्राजलपूतगात्रामार्गप्रदेशावसतो किलमार्गशीर्षे ॥ हालास्यवेणुविपिनेश्वरपाप
नाशसंदर्शनाच्छुचिपराश्चनराः शुचींद्रे ॥ १५ ॥ रामेश्वरे शिवधनुर्भवजाब्धिकोटिसंस्नाननोशिवम
हेश्वरवीक्षणोत्र ॥ वल्मीकवेदविपिनेकमलाक्ष   ।नशिखरेश्वरदर्शकाये ॥ १६ ॥ श्वेताटवीश
घटजेश्वरदभ्रकेशनांडवंभुविविलोकिनएवचाद्रां पुण्यारुणाद्रिशिखरस्मृतिधूतपापादोपावलोक
नरुतोत्रवसंतिचात्र ॥ १७ ॥ वृद्धाद्रिगोनगनिवाससुकृतिवासपादार्चकासुनियतामघनादिदीनाः ॥
श्रीकालहस्तिमुखरीजलपूतगात्राः सुत्रामममान्यपदवीमदवीयसीते ॥ १८ ॥ संप्राप्नुवंति शिवरात्रिदि
नेमहेशहस्तीशदेवीपदपद्मसुपूजकाये ॥ श्रीकंठगोकर्णविलोकिनोत्रत्नर्णप्रसादसमवाप्यपूर्णे ॥
१९ ॥ घूर्णन्निनिद्रालसलोलनेत्रामंवेषया नैवहिपुण्यभाजः शिवाज्ञयेनेपरिपूजिताः सदासुरेमहे
शस्य सुभक्तवर्याः ॥ २० ॥ आर्यानयाचार्यधुरंधरामयासंपश्यकैलासनगेविलासं ॥ किमत्रचित्रंकर
वाणियाण्या संयोज्यमांपाहिपुनीहिभक्तौ तदृष्टिकारुण्यसुपूर्णवर्षणे मामद्यनम्रंकुरुवेमुनेद ॥
गार्यंमहेशायतथाशिवायेस्वभक्तपूजांविहितांमयात्र ॥ २२ ॥ ९३ ॥ ॥ इतिश्रीशिवरहस्ये ईशाना श्रीशिव
ख्ये दशमांशे उत्तरभागे ईशानसुनंदसंवादे नवचत्वारिंशोध्यायः ॥ ४९ ॥ ॥ ईशानायनमः ॥ ॥
स्कंद उवाच ॥ ॥ ईशानवचनंश्रुत्वा संवीक्ष्यचशिवार्चकान ॥ संतुष्टहृदयोभूत्वानमुवाचगणेश्वरः
॥ १ ॥ ॥ सुनंद उवाच ॥ ॥ ईशानत्वंहिधन्योसिसदाशिवपदार्चकः ॥ ईशार्चनात्वयाप्राप्तं सारूप्यं
परमीशितुः ॥ २ ॥ त्रिनेत्रो नीलकंठश्च बालेंदुकृतशेखरः ॥ शिवाज्ञयावसन्नत्र कैलासेदक्षिणेगणेः ॥ ३ ॥

शिवधर्मरुद्दर्यातः त्वयि प्रीतो भवेच्छिवः॥ नतेसमोस्ति लोकपालः शिवाज्ञापरिपालकः॥४॥ तवकैलास
मौलिस्था सर्वे एते शिवार्चकाः॥ त्वया संपूजिता भोगान्भुंजते ऽशिवाज्ञया॥५॥ शिवाय देवदेवाय शिवा
यै वरदाय महे॥ स्कंदाय नंदिकेशाय विघ्नेशायाथ चंडिने॥६॥ त्वया संपूजिताः प्रीताः निवसंतीति साद
रं॥ तव दक्षिण कैलासे शिवावासे मनोहरे॥७॥ कृत्तिवासपदद्वंद्वे निवसंत्येव ते सदा॥ चारुचंद्रावतं
सास्ते त्वयात्रैव समर्चिताः॥ उदारास्तेम होदारा हारा रंग्वहिसादराः॥ तेषामत्र विहारोहि कैलासे दक्षि
णे तव॥९॥ सर्वभाग्ययुताः सर्वे सौभाग्यपतिपूजया॥ त्वद्भाग्यस्यनांतोस्ति शेषसंपूजनादपि॥१०॥
अत्रत्या येजनाः सर्वे शिवधर्मरता नरे॥ शिवसारूप्यमापन्नाः संपन्ना शिवपूजया॥११॥ पंचाक्षरे
णचाप्यत्र रुद्रसूक्तजपेन वै॥ मेरुमस्तककैलासे दक्षिणे बिल्वमूलके॥ पूजयंतिसदा कालमीशा
नं भुवनेश्वरं॥१२॥ तस्मात्त्वं संवसंस्तत्र शिवधर्मपरास्सदा॥ समागतोऽश्वदेहांते पूजयस्व युगेयुगे॥१३॥
महाकैलाससदनं मदनांतकरप्रियं॥ गच्छाम्यहं मुदेशान शिव [illegible] सेवार्थमेवहि॥१४॥ बलिंब
नात्सेवकानां स्वामिनः कोपउपविशेत॥ ततथा भगवांछंभुः सहमानः सदैवहि॥१५॥ स्वभक्तेषु न चक्रो
धं करिष्यति सदा मुदा॥ गमिष्यामि शिवागारं त्वयानुज्ञातरग्वहि॥१६॥ इत्युक्तोऽथ मुनंदेन ईशानोऽथ
तदा मुदा॥ ततस्यकरमालंव्य स्वगृहं प्रापयत्तदा॥ यक्षराजेन सहितः स्नात्वा मानसवारिणि॥ सुनं
देन गणेंद्रेण गणेशैः यक्षपुंगवैः॥१८॥ भस्मधृत्वा त्रिपुंड्रांकाः शिवलिंगार्चका भवन्॥ बिल्वैः पुष्पैर्धू
प दीपैर्नैवेद्यैर्भक्ष्यभोज्यकैः॥१९॥ निवेदितैश्च बुभुजुः मुदेशानगणेश्वरौ॥ यक्षराजेन सहितः यक्षे
गणवरैः सह॥२०॥ तांबूलैर्भूषणैर्वस्त्रैरीशानः पूजयद्गणं॥ गंधैर्मनोहरैस्तत्र रुद्राणीनतदर्चा
नैः॥२१॥ उचतुस्तत्र गणपं यक्षेशानौ तदा मुदा॥ ॥यक्षेशानौ ऊ॥ ॥पाहि त्वं गणपः श्रेष्ठ विज्ञाप्यो

वास्थितो सदा॥ शिवभक्तार्चनपरोऽयं क्षेत्रेशोऽनघोऽस्थितः॥२२॥ सौम्येन चक्षुषापश्य पुनर्नोऽस्तु समागमः॥ ओमित्युक्त्वाथ सानंदं यक्षेशोऽशान पूजितः॥२३॥ महाकैलासनिलयं सेवितुं प्रययौ तदा॥ दूरतः शिखरं दृष्ट्वा विमानादवरुह्य च॥२४॥ महाकैलासमौलेर्वै प्रणाममकरोत्तदा॥ ततो पश्यद्गणश्रेष्ठान्नंदिकेशपुरोगमान्॥२५॥ प्रणम्य नंदिकेशानमन्यानालिंग्य तत्र वै॥ सेवावसरमासाद्य नंदिना सहितो ययौ॥२६॥ दृष्ट्वा तत्र महादेव्या संस्थितं वरदासने॥ प्रवालमंडपे दिव्ये मणागजमुखेन च॥२७॥ पार्श्वतो वीजितसितचामरद्वयशोभितं॥ धूपदीपैश्च विततं सर्वाभरणभूषितं॥२८॥ त्रिपुंड्रविलसत्फालं शशिगंगाधरं हरं॥ त्रिनेत्रं नीलकंठं च मंदस्मितमुदीक्ष्य सः॥२९॥ प्रणाममकरोत्तत्र गणेंद्रोऽथ सुनंदकः॥ तमाह प्रणतं सांबो वत्सोत्तिष्ठेति सादरं॥३०॥ ॥ईश्वर उवाच॥ ॥ चिराय मे किमाश्चर्यं त्वया दृष्टं वदस्व मे॥ तदा हरमुखांभोजाच्छ्रुत्वा वाक्यं स्तुवन् जगौ॥३१॥ ॥सुनंद उवाच॥ ॥प्रसीद प्रसीद प्रभो चंद्रमौले प्रसीद प्रसीद प्रभो दीनबंधो॥ प्रसीद प्रसीद प्रभो विश्वमूर्ते प्रसीद प्रसीद प्रभो पुण्यमूर्ते॥३२॥ अंभोजजाननवदनोद्गतघोषतोषपोषाविशेषपरिभूषितशेषकाय॥ योषार्धकाय भगवन्नरशेषमेनत्। भस्मीभूतविषप्रघोषदयया संशोषिताऽनंगमामीष त्कार्यजगल्लय स्थितिभवत्पूषेंदुसन्निभ विभो॥ जय प्रमथनाथ मे विलसदुग्रदिंदुप्रभाविराजितकपर्द क त्रिदशभात्यकाशावस॥ प्रपंचरचनेक्षणं नवविनोद हेतुस्थलं भुवस्थलमथो गलो यमसुराजधानीमपि॥३४॥ विलोक्य च शिव द्रुहां विविधयाननासंभ्रमं शिवस्मरणतोऽखिलान् बलतमानहं पावये॥ शिवद्रुहस्तेन नरके च यथा हितास्यमेन नित्यं स्वकशाभिताडिताः॥ त्वद्भक्तिभाजो त्रजनाः समाहिता ईशानमुख्यैर्गणपैः समर्चिताः॥ नयमां नयमांति किं विभो नियमाद्धि तव नाममात्रजाप्यात्॥ इति संततनमं तकांतक द्रुहामश्रणो मीशासदैव शास्वभारं॥३७॥ हेलालीलातव

यं यमादिशि कलये कालकालनलाक्षज्वालाकीलीननारकौघनिलयेको ला हलः श्वपने॥ श्वला
गैर्वनकोलदंष्ट्रनिवहैर्याम्यैर्लुलायोग्रकैः॥ शृंगैः पादनलाभिघातकुटिलं तन्नारकैरुज्वलं॥
॥३८॥ नपक्षपातं कुरुते यमोसौ शिवद्रुहां नारकिदंडधारणे॥ त्वद्भक्तवर्या अपि दक्षिणेत्र वसंति
ईशान सम्मर्चितामुदा॥३९॥ ॥ श्रीस्कंद उवाच॥ ॥ सुनंदसानंदवचो निशम्य शम्याकमौलिः शि
वयानुनेष॥ नदामयाश्वाविचारितं मे यांशिवद्रुहां वै शिवधर्मिणामपि॥ ४०॥ ॥ इति श्रीशिवर
हस्ये ईशानाख्ये दशमांशोत्तरभागे सुनंददर्शनं नाम पंचाशोध्यायः॥५०॥ ॥ इति श्रीशिवरहस्ये
ईशानाख्ये दशमांश उत्तरार्धः समाप्तः॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीशिवायनमः॥
शक १८२० म॰७ जुलाई ता॰१

श्रीशिवर०१०

५०

ई०द०उ०

श्रीशिव०

५०